GOVERNMENT OF TAMILNADU

# संस्कृतरञ्जनी

# SANSKRIT READER

## VIII STD

" सह नाववतु सह नौ भुनक्तु
सह वीर्यं करवावहै "

Department of School Education

**Untouchability is Inhuman and a Crime**

Untitled-1 1 02-01-2024 15:12:45

**Government of Tamil Nadu**

First Edition - 2019

Reprint - 2020, 2021, 2022

2023, 2024

Published under New Syllabus

**Content Creation**

State Council of Educational Research and Training

© SCERT 2019

**Printing & Publishing**

Tamil NaduTextbook and Educational Services Corporation

www.textbooksonline.tn.nic.in



Introduction Pages.indd 2 22-03-2019 14:41:20

# आमुखम् - Preface

"विद्याधनं सर्वधनप्रधानम्" इत्युक्तिः। अत एव मनुष्याः तद्धनमार्जयितुं यतन्ते। तत्रापि बालकाः विद्यालयेषु छात्रान् भूत्वा तदार्जयन्ति। यतो हि, विद्यया विना कस्यापि गौरवं न आगच्छति। विद्या गुरूणां गुरुः भवति।

अद्यत्वे केवलं पुस्तकस्था विद्या छात्राणां सुखकरी न भवति। सैव विद्या भवति या भविष्यत्काले स्वस्वप्नं वास्तविकं कर्तुम् उपयुक्ता भवेत्। अतः अद्यत्वे पुस्तकीयज्ञानेन सह प्रायोगिकज्ञानसंपादनाय अवसरः प्रकल्पितः विद्यते।

परं भारतीयाः महर्षयः शिष्येभ्यः तादृशीमेव ज्ञानकरीं विद्याम् अबोधयन् इत्ययं विषयः संस्कृतग्रन्थैः ज्ञायते। अतः छात्राणां कृते संस्कृताध्ययनं महदुपकारं कल्पयति। तत्र विद्यामानाः वेदस्मृत्यादयः ग्रन्थाः छात्राणां कृते भारतीयसंस्कृतिं संबोध्य, सन्मार्गप्रवर्तने धर्मेण वर्तितुं च उत्साहं जनयति।

प्रस्तुतं अष्टमकक्ष्यायाः कृते निर्मितमिदं संस्कृतपाठ्यपुस्तकं तावत् अस्माकं संस्कृतिं, देशस्य औन्नत्यं, सनातनधर्मस्य च महत्वं कथयति। इदं यथा छात्राणां श्रवण-भाषण-पठन-लेखनमिति चत्वारि कौशलानि विकसितानि भवेयुः, छात्राः अत्रोक्तैः नीतिविषयैः अस्माकं संस्कृतिं ज्ञात्वा, पूर्वजानां आचारमवगत्य च सदा सन्मार्गप्रवर्तने यतेयुः, मिथ्याज्ञानमपाकृत्य वास्तविकं ज्ञानं प्राप्नुयुः, केवलं मौखिकपठनम् अपाकृत्य सचिन्तनं व्यवहर्तुं प्रयत्नं कुर्युः, एवं च पारम्परिकभाषात्वेन विद्यमानया तमिल्भाषया सह तुलनां कृत्वा उभयोः तमिल्संस्कृतयोः महत्वं जानीयुः, तथा निर्मितं पाठ्यपुस्तकं छात्राणां सर्वाङ्गीनविकासाय स्वलक्ष्यप्राप्तये च शिक्षकसमित्या परिकल्पितं विद्यते।

अस्मिन् पाठ्यपुस्तके प्रधानतया गद्यं, पद्यं, व्याकरणमिति भागत्रयं वर्तते। एकैकस्मिन् विभागे शब्दकोशः, अर्थकोशः, अर्थज्ञानकौशलाभ्यासाः, भाषाज्ञानकौशलाभ्यासाः, कौशलवर्धनावृत्यभ्यासाः इति लक्ष्येषु विषयाः संकलिताः सन्ति।

अर्थज्ञानकौशलाभ्यासे प्रश्नाः पृष्टाः सन्ति। एते प्रश्नाः पाठविषयमभिप्रेत्य पृष्टाः। ततः परं भाषाज्ञानकौशलवर्धकाः प्रश्नाः सन्ति।

गद्यभागे स्थितानां पाठानां पदशब्दप्रयोगमधिकृत्य विषयाः स्थापिताः सन्ति । व्याकरणं च पाठाननुसृत्य अध्यापनीयमिति मत्वा तथा व्याकरणविषयाः निबद्धाः सन्ति यथा छात्राः सुलभेन पाठान् अवगच्छेयुः ।



Introduction Pages.indd 3 22-03-2019 14:41:20

# देशीयगीतम्

जन गण मन अधिनायक जय हे
भारत भाग्य विधाता
पञ्जाब सिन्धु गुजरात मराठा
द्राविड उत्कल बङ्गा
विन्ध्य हिमाचल यमुना गङ्गा
उच्छल जलधि तरङ्गा
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय गाथा
जन गण मङ्गल दायक जय हे
भारत भाग्य विधाता
जय हे जय हे जय हे
जय जय जय जय हे !

महाकवि रवीन्द्रनाथ ठाकुरः

अस्पृश्यत्वम् अपचारः
अस्पृश्यत्वम् अपराधः
अस्पृश्यत्वम् अमानवधर्मः



Introduction Pages.indd 4 22-03-2019 14:41:20

# राष्ट्रिय प्रतिज्ञा

सर्वे वयं भारतदेशबालाः
स्वातन्त्र्यपीयूषसरोमरालाः ।
नीचोच्चजात्यादिविभेदशून्याः
सर्वे समानाश्च सहोदराश्च ।। ।।1।।

एको भावः सर्वसंक्षेपरूपः
एका भाषा भूतकारुण्यरूपा ।
एकं लक्ष्यं सामरस्यं समेषां
एकं तत्वं चित्तमानन्दपूर्णम् ।। ।।2।।



Introduction Pages.indd 5 22-03-2019 14:41:20

# SANSKRIT AND CULTURE GO TOGETHER

- Swami Vivekananda

## OBJECTIVES:-

- To create interest in Sanskrit learning.
- To make the school going children to understand the precepts and practice of Indian culture and to inherit the leadership qualities.
- To enjoy the ancient classic with aesthetic experience.
- To prepare the students to speak, quote and compare Sanskrit with other languages.
- To morally and ethically enrich the attitude of students in order to make them as noble citizens of India.

Tamil and Sanskrit are friendly Classical languages of our motherland for so many centuries.

Both the languages have mutual affinity to each other. Hence the learning of Sanskrit language in Tamil Nadu would help the comparative studies in future.

Of course, Sanskrit learning along with Tamil (उभयप्रधान) mutually giving importance to each other was in vogue for many decades.

However, an attempt through this preparation of Textbooks has been made to enthuse the students not only to read Sanskrit in its original tongue but also to understand the merits of both the classical languages.

The listening and understanding the meaning of the word and sentences deeply reflecting the values and contents would be highly useful for the students of today.

The present preparation of the Sanskrit Textbooks for the Class 8 adopt the modern methodology by way of framing typical questions that would enhance the memory as well as the language speaking skills of the students.

Meticulous care has been taken to select portions suitable to the respective standards after comparing the contents of Sanskrit books prescribed in various standards in various states.

Apart from the course book and the workbook, study materials are given for additional reading to enrich the knowledge of the students.

The assessment and the examination pattern are in par with other languages taught in unified syllabus of Tamil Nadu.

**-Text Book Committee**



Introduction Pages.indd 6 22-03-2019 14:41:20

# विषयसूची – (INDEX)


| पाठः (Lesson) | विषयः (Topic) | पृष्ठसंख्या (Page No.) |
|---|---|---|
| भाषापरिचयः | वर्णस्मृतिः | |
| 1. प्रथमः पाठः | द्रविडसुभाषितानि | 1 |
| 2. द्वितीयः पाठः | लोहमान्यः लोकमान्यः च | 8 |
| व्याकरण-अभ्यासः - 1 | उकारान्ताः अजन्तपुंलिङ्गशब्दाः | |
| 3. तृतीयः पाठः | सौन्दर्यगीतम् | 15 |
| 4. चतुर्थः पाठः | कविश्रेष्ठाः | 21 |
| व्याकरण-अभ्यासः - 2 | धातुः - परस्मैपदी - लृट् लकारः | |
| 5. पञ्चमः पाठः | सुभाषितानि | 27 |
| 6. षष्ठः पाठः | सद्वृत्तम् | 35 |
| व्याकरण-अभ्यासः - 3 | उकार-ऊकारान्ताः अजन्तस्त्रीलिङ्गशब्दाः | |
| 7. सप्तमः पाठः | जलिविज्ञानम् | 42 |
| 8. अष्टमः पाठः | हितभोजनम् | 48 |
| व्याकरण-अभ्यासः - 4 | धातुः - परस्मैपदी - लृट् लकारः | |
| 9. नवमः पाठः | सत्यसन्धः | 54 |
| 10. दशमः पाठः | दानवीरः कर्णः | 60 |
| व्याकरण-अभ्यासः - 5 | उकारान्ताः अजन्तनपुंसकलिङ्गशब्दाः | |
| 11. एकादशः पाठः | भूषणमहत्वम् | 66 |
| 12. द्वादशः पाठः | शिष्यलक्षणम् | 71 |
| व्याकरण-अभ्यासः - 6 | धातुः - परस्मैपदी - लृट् लकारः | |

## मङ्गलाचरणम्

### ऐक्यमन्त्रः

यं वैदिका मन्त्रदृशः पुराणाः
इन्द्रं यमं मातरिश्वानमाहुः ।
वेदान्तिनोऽनिर्वचनीयमेकं
यं ब्रह्मशब्देन विनिर्दिशन्ति ।। ।।1।।

शैवा यमीशं शिव इत्यवोचन्
यं वैष्णवा विष्णुरिति स्तुवन्ति ।
बुद्धस्तथार्हन्निति बौद्धजैनाः
सच्छ्री अकालेति च सिक्खसन्तः।। ।।2।।

शास्तेति केचित् कतिचित् कुमारः
स्वामीति मातेति पितेति भक्त्या
यं प्रार्थयन्ते जगदीशितारं
स एक एव प्रभुरद्वितीयः ।। ।।3।।



Introduction Pages.indd 8 22-03-2019 14:41:20

“Sanskrit is like the river Ganga for our languages, If it were to dry up, the regional languages also would lose their vitality and power.”

**– Mahatma Gandhiji**

“The past has gone and the present is with us and we work for thefuture, But I have no doubt that whatever shape that future may take, one of the biggest, the strongest and the most powerful and the most valued, of our legacies will be the Sanskrit language.”

**– Pandit Jawaharlal Nehru**

“Sanskrit is the most suitable language that could be made the official language.”

**– Dr. Ambedkar**

“I often wonder which is the most important of the many things that have distinguished India in the past, in its history of years. I have no doubt at all in my mind that it is the Sanskrit language. It is that which has embodied the genius and wisdom of our race. Almost everything that has come out in later years can somehow be found to have sprung from this ancient language only.”

**- Dr. S. Radhakrishnan**

# भाषापरिचयः



Introduction Pages.indd 10 22-03-2019 14:41:20

## वर्णस्मृतिः

वर्णाः (Letters)
எழுத்துக்கள்

स्वराः (अचः)
Vowels
உயிரெழுத்துக்கள்

व्यञ्जनानि (हलः)
Consonants
மெய்யெழுத்துக்கள்

### (i) स्वराः (Vowels)

स्वराः - यस्य वर्णस्य उच्चारणे अपरस्य वर्णस्य सहायता नापेक्षिता, तस्य स्वरः इति नाम। यथा -

अ आ इ ई उ ऊ ऋ ॠ

ऌ ए ऐ ओ औ अं अः

स्वराः

ह्रस्वः (Short)
குறில்

दीर्घः (Long)
நெடில்

### ह्रस्वस्वराः (Short Vowels)

अ इ उ ऋ ऌ

### दीर्घस्वराः (Long Vowels)

आ ई ऊ ॠ ए ऐ ओ औ

### (ii) हलः (व्यञ्जनानि) Consonants

व्यञ्जनानि – यस्य वर्णस्य उच्चारणे स्वरवर्णस्य सहायता अपेक्षिता तस्य हलः इति नाम।

| | | | | | | |
|---|---|---|---|---|---|---|
| कवर्गः | - | क | ख | ग | घ | ङ |
| चवर्गः | - | च | छ | ज | झ | ञ |

| | | | | | | |
|---|---|---|---|---|---|---|
| टवर्गः | - | ट | ठ | ड | ढ | ण |
| तवर्गः | - | त | थ | द | ध | न |
| पवर्गः | - | प | फ | ब | भ | म |
| अन्तस्थाः | - | य | र | ल | व | |
| ऊष्माणः | - | श | ष | स | ह | |

### (iii) स्वरयुक्तव्यञ्जनाक्षराणि (Compound letters)

| | | | | |
|---|---|---|---|---|
| क् + अ = क | ख्+ अ = ख | ग्+ अ = ग | घ्+ अ = घ | ङ्+ अ = ङ |
| च्+ अ = च | छ्+ अ = छ | ज्+ अ = ज | झ्+ अ = झ | ञ्+ अ =ञ |
| ट्+ अ = ट | ठ्+ अ = ठ | ड्+ अ = ड | ढ्+ अ = ढ | ण्+ अ =ण |
| त्+ अ = त | थ्+ अ = थ | द्+ अ = द | ध्+ अ = ध | न्+ अ =न |
| प्+ अ = प | फ्+ अ = फ | ब्+ अ = ब | भ्+ अ = भ | म्+ अ =म |
| य् + अ = य | र्+ अ = र | ल्+ अ = ल | व्+ अ = व | श्+ अ =श |
| ष्+ अ = ष | स्+ अ = स | ह्+ अ = ह | | |



Introduction Pages.indd 12 22-03-2019 14:41:21

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| क | का | कि | की | कु | कू | कृ | कॄ | कॢ | के | कै | को | कौ | कं | कः |
| ख | खा | खि | खी | खु | खू | खृ | खॄ | खॢ | खे | खै | खो | खौ | खं | खः |
| ग | गा | गि | गी | गु | गू | गृ | गॄ | गॢ | गे | गै | गो | गौ | गं | गः |
| घ | घा | घि | घी | घु | घू | घृ | घॄ | घॢ | घे | घै | घो | घौ | घं | घः |
| ङ | ङा | ङि | ङी | ङु | ङू | ङृ | ङॄ | ङॢ | ङे | ङै | ङो | ङौ | ङं | ङः |
| च | चा | चि | ची | चु | चू | चृ | चॄ | चॢ | चे | चै | चो | चौ | चं | चः |
| छ | छा | छि | छी | छु | छू | छृ | छॄ | छॢ | छे | छै | छो | छौ | छं | छः |
| ज | जा | जि | जी | जु | जू | जृ | जॄ | जॢ | जे | जै | जो | जौ | जं | जः |
| झ | झा | झि | झी | झु | झू | झृ | झॄ | झॢ | झे | झै | झो | झौ | झं | झः |
| ञ | ञा | ञि | ञी | ञु | ञू | ञृ | ञॄ | ञॢ | ञे | ञै | ञो | ञौ | ञं | ञः |
| ट | टा | टि | टी | टु | टू | टृ | टॄ | टॢ | टे | टै | टो | टौ | टं | टः |
| ठ | ठा | ठि | ठी | ठु | ठू | ठृ | ठॄ | ठॢ | ठे | ठै | ठो | ठौ | ठं | ठः |
| ड | डा | डि | डी | डु | डे | डृ | डॄ | डॢ | डे | डै | डो | डौ | डं | डः |
| ढ | ढा | ढि | ढी | ढु | ढे | ढृ | ढॄ | ढॢ | ढे | ढै | ढो | ढौ | ढं | ढः |
| ण | णा | णि | णी | णु | णू | णृ | णॄ | णॢ | णे | णै | णो | णौ | णं | णः |
| त | ता | ति | ती | तु | तू | तृ | तॄ | तॢ | ते | तै | तो | तौ | तं | तः |
| थ | था | थि | थी | थु | थु | थृ | थॄ | थॢ | थे | थै | थो | थौ | थं | थः |
| द | दा | दि | दी | दु | दू | दृ | दॄ | दॢ | दे | दै | दो | दौ | दं | दः |
| ध | धा | धि | धी | धु | धू | धृ | धॄ | धॢ | धे | धै | धो | धौ | धं | धः |
| न | ना | नि | नी | नु | नू | नृ | नॄ | नॢ | ने | नै | नो | नौ | नं | नः |
| प | पा | पि | पी | पु | पू | पृ | पॄ | पॢ | पे | पै | पो | पौ | पं | पः |
| फ | फा | फि | फी | फु | फू | फृ | फॄ | फॢ | फे | फै | फो | फौ | फं | फः |
| ब | बा | बि | बी | बु | बू | बृ | बॄ | बॢ | बे | बै | बो | बो | बं | बः |
| भ | भा | भि | भी | भु | भू | भृ | भॄ | भॢ | भे | भै | भो | भौ | भं | भः |
| म | मा | मि | मी | मु | मू | मृ | मॄ | मॢ | मे | मै | मो | मौ | मं | मः |
| य | या | यि | यी | यु | यू | यृ | - | - | ये | यै | यो | यौ | यं | यः |
| र | रा | रि | री | रु | रू | - | - | - | रे | रै | रो | रौ | रं | रः |
| ल | ला | लि | ली | लु | लू | लृ | - | - | ले | लै | लो | लौ | लं | लः |
| व | वा | वि | वी | वु | वू | वृ | वॄ | वॢ | वे | वै | वो | वौ | वं | वः |
| श | शा | शि | शी | शु | शू | शृ | शॄ | शॢ | शे | शै | शो | शौ | शं | शः |
| ष | षा | षि | षी | षु | षू | षृ | षॄ | षॢ | षे | षै | षो | षौ | षं | षः |
| स | सा | सि | सी | सु | सू | सृ | सॄ | सॢ | से | सै | सो | सौ | सं | सः |
| ह | हा | हि | ही | हु | हू | हृ | हॄ | हॢ | हे | है | हो | हौ | हं | हः |



Introduction Pages.indd 13 22-03-2019 14:41:21

## (iv) संयुक्ताक्षराणि
## Conjunct Consonants

| | | | |
|---|---|---|---|
| क् | च्+ छ= च्छ | ड्+ र= ड्र | द्+ व= द्व |
| क् + क= क्क | च्+ न= च्न | ण् | द् + ध= द्ध |
| क् + त= क्त | च्+ म= च्म | ण्+ क= ण्क | द्+ र= द्र |
| क् + य= क्य | च्+ र= च्र | ण्+ ड= ण्ड | द् + म= द्म |
| क् + र= क्र | ज् | ण्+ ण= ण्ण | द्+ य= द्य |
| क् + ष= क्ष | ज्+ ज= ज्ज | त् | ध् |
| क् + व= क्व | ज्+ न= ज्न | त्+ क= त्क | ध्+ न= ध्न |
| ख् | ज्+ म= ज्म | त्+ त= त्त | ध्+ म= ध्म |
| ख्+ य= ख्य | ज्+ य = ज्य | त्+ म= त्म | ध्+ य= ध्य |
| ग् | ज्+ र = ज्र | त्+ न= त्न | ध्+ र= ध्र |
| ग्+ म= ग्म | ज् + ञ= ज्ञ | त्+ र= त्र | ध्+ व= ध्व |
| ग्+ न= ग्न | ट् | त्+ य = त्य | न् |
| ग्+ र = ग्र | ट्+ ट= ट्ट | त्+ व= त्व | न्+ क= न्क |
| घ् | ट्+ य = ट्य | थ् | न्+ त= न्त |
| घ्+ म= घ्म | ट्+ र= ट्र | थ्+ य = थ्य | न्+ द= न्द |
| घ्+ न= घ्न | ठ् | थ्+ व= थ्व | न्+ न= न्न |
| घ् + य= घ्य | ठ्+ य = ठ्य | थ्+ र= थ्र | न्+ म= न्म |
| घ् + र= घ्र | ड् | द् | न्+ व= न्व |
| च् | ड्+ ड= ड्ड | द्+ ग= द्ग | प् |
| च्+ च= च्च | ड्+ य = ड्य | द्+ द= द्द | प्+ त= प्त |



Introduction Pages.indd 14 22-03-2019 14:41:21

प्+ न= प्न

प्+ म= प्म

प्+ य= प्य

प्+ र= प्र

फ्

फ् + ल= फ्ल

ब्

ब्+ ज= ब्ज

ब्+ द= ब्द

ब्+ ध= ब्ध

ब्+ व= ब्व

ब्+ र= ब्र

भ्

भ्+ न= भ्न

भ्+ य= भ्य

भ्+ व= भ्व

भ्+ र= भ्र

म्

म्+ न= म्न

म्+ म= म्म

म्+ य= म्य

म्+ ल= म्ल

म्+ र= म्र

य्

य्+ य= य्य

य्+ व= य्व

र्

र्+ क= र्क

र्+ त= र्त

र्+ न= र्न

र्+ म= र्म

र्+ य= र्य

ल्

ल्+ क= ल्क

ल्+ त= ल्त

ल्+ न= ल्न

ल्+ प= ल्प

ल्+ ल= ल्ल

व्

व्+ न= व्न

व्+ य= व्य

व्+ र= व्र

श्

श्+ च= श्च

श्+ छ= श्छ

श्+ न= श्न

श्+ व= श्व

श्+ र= श्र

ष्

ष्+ क= ष्क

ष्+ ट= ष्ट

ष्+ ण= ष्ण

ष्+ म= ष्म

ष्+ र= ष्र

स्

स्+ क= स्क

स् + त= स्त

स्+ थ = स्थ

स् + म= स्म

स्+ र= स्र

ह्

ह्+ व= ह्व

ह् + ण= ह्ण

ह्+ न = ह्न

ह् + म= ह्म

ह् + य = ह्य

ह् + र= ह्र

## लिङ्गज्ञानम्

### (i) पुल्लिङ्गपदानि

| | | | | |
|---|---|---|---|---|
| 1. बालकः | 2. अजः | 3. गजः | 4. अश्वः | 5. रथः |
| 6. हस्तः | 7. नरः | 8. वानरः | 9. छात्रः | 10. अध्यापकः |
| 11.वृक्षः | 12. बकः | 13. कन्दुकः | 14. सूर्यः | 15. मकरः |
| 16. शशकः | 17. हंसः | 18. काकः | 19. मेघः | 20.मीनः |
| 21. मयूरः | 22. मृगः | 23. सिंहः | 24.पर्वतः | 25. चन्द्रः |
| 26. कृषकः | 27. पिकः | 28. सर्पः | 29. शुकः | 30. गर्दभः |

### (ii) स्त्रीलिङ्गपदानि

| | | | | |
|---|---|---|---|---|
| 1. बालिका | 2. लता | 3. पेटिका | 4. शिबिका | 5. माला |
| 6. छात्रा | 7. अध्यापिका | 8. सेविका | 9. महिला | 10. मक्षिका |
| 11. कलिका | 12. वाटिका | 13. शाखा | 14. घटिका | 15. नौका |
| 16. वर्तिका | 17. पताका | 18. चटका | 19. शाटिका | 20. सरिता |
| 21. पाठशाला | 22. पत्रिका | 23. वेला | 24. वेदिका | 25. कन्या |
| 26. प्रतिमा | 27. कुल्या | 28. मासिका | 29. जिह्वा | 30. पादुका |

### (iii) नपुंसकलिङ्गपदानि

| | | | | |
|---|---|---|---|---|
| 1. फलम् | 2. पत्रम् | 3. गृहम् | 4. पुष्पम् | 5. कमलम् |
| 6. शाकम् | 7. नेत्रम् | 8. मुखम् | 9. धनम् | 10. जलम् |
| 11. चित्रम् | 12. वनम् | 13. विमानम् | 14. दुग्धम् | 15. भवनम् |
| 16. उद्यानम् | 17. नक्षत्रम् | 18. नगरम् | 19. पुस्तकम् | 20. छत्रम् |
| 21. बीजम् | 22. यन्त्रम् | 23. ओदनम् | 24. वस्त्रम् | 25. मोदकम् |
| 26. सोपानम् | 27. पात्रम् | 28. ज्ञानम् | 29. शरीरम् | 30. उपनेत्रम् |



Introduction Pages.indd 16 22-03-2019 14:41:21

## वचनविभागः

### (i) पुल्लिङ्गवचनानि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | बालकः | बालकौ | बालकाः |
| 2. | अजः | अजौ | अजाः |
| 3. | गजः | गजौ | गजाः |
| 4. | रथः | रथौ | रथाः |
| 5. | वृक्षः | वृक्षौ | वृक्षाः |
| 6. | वानरः | वानरौ | वानराः |
| 7. | अश्वः | अश्वौ | अश्वाः |
| 8. | मयूरः | मयूरौ | मयूराः |
| 9. | शुकः | शुकौ | शुकाः |
| 10. | सिंहः | सिंहौ | सिंहाः |

### (ii) स्त्रीलिङ्गवचनानि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | बालिका | बालिके | बालिकाः |
| 2. | लता | लते | लताः |
| 3. | माला | माले | मालाः |
| 4. | पेटिका | पेटिके | पेटिकाः |
| 5. | महिला | महिले | महिलाः |
| 6. | पताका | पताके | पताकाः |
| 7. | शाखा | शाखे | शाखाः |
| 8. | पाठशाला | पाठशाले | पाठशालाः |
| 9. | नौका | नौके | नौकाः |
| 10. | मक्षिका | मक्षिके | मक्षिकाः |



Introduction Pages.indd 17 22-03-2019 14:41:21

## (iii) नपुंसकलिङ्गवचनानि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | फलम् | फले | फलानि |
| 2. | पत्रम् | पत्रे | पत्राणि |
| 3. | कमलम् | कमले | कमलानि |
| 4. | नेत्रम् | नेत्रे | नेत्राणि |
| 5. | धनम् | धने | धनानि |
| 6. | वनम् | वने | वनानि |
| 7. | विमानम् | विमाने | विमानानि |
| 8. | गृहम् | गृहे | गृहाणि |
| 9. | मोदकम् | मोदके | मोदकानि |
| 10. | पुस्तकम् | पुस्तके | पुस्तकानि |



Introduction Pages.indd 18 22-03-2019 14:41:21

Lesson 1 प्रथमः पाठः

# द्रविडसुभाषितानि

तमिलभाषायां सङ्घकालात्परं लिखितेषु नीतिग्रन्थेषु नरुन्तोगै ग्रन्थः अन्यतमः भवति । अस्य कर्ता अतिवीररामपाण्ड्यः । युवकानां सदाचारज्ञानाय सुष्ठु प्रयुक्तः अयं ग्रन्थः । ततः अस्मिन् पाठ्यभागे केचन नीतयः स्वीकृताः विद्यन्ते ।



1. यस्तु विद्यां प्रयच्छति, दैवस्थाने स तिष्ठति ।

   எழுத்தறி வித்தவன் இறைவனாகும்

2. सौष्ठवम् अस्ति विद्यायाः, दोषराहित्यभाषणम् ।

   கல்விக் கழகு கசடற மொழிதல்

3. धनिकानां तु सामर्थ्यं, स्वबन्धुकुलरक्षणे।

   செல்வர்க் கழகு செழுங்கிளை தாங்குதல்

4. नीतियुक्तं प्रशासनं, तत्तु राज्ञां सशासनम् ।

   மன்னவர்க் கழகு செங்கோல் முறைமை



unit 1.indd 1 21-03-2019 10:02:20

5. व्यापारिणां सकार्यं तु, अह्रासधनवर्धनम् ।
வணிகர்க் கழகு வளர்பொருளீட்டல்

6. कृषकाणां सजीवनं, स्वकर्मागतभोजने ।
உழவர்க் கழகு ஏர் உழுதூண் விரும்பல்

7. लक्षणम् अस्ति मन्त्रिणां, भाविकालप्रसूचनम् ।
மந்திரிக் கழகு வரும்பொருளுரைத்தல்

8. शमयुक्तं हि पाण्डित्यं, पण्डितानां यशस्करम् ।
அறிஞற் கழகு கற்றுணர்ந் தடங்கல்

9. शीलयुक्तो भवेन्नित्यं, दरिद्रः स्वस्थितावपि ।
வறிஞர்க் கழகு வறுமையில் செம்மை

10. भोजनं कथ्यते तद् वै, अतिथिना सहाशने ।
உண்டிக் கழகு விருந்தோ டுண்டல்

**कविपरिचयः**

अतिवीररामः नाम पाण्ड्यराजा कोर्कै नामकं नगरं शशास। सः तमिल्- भाषायां बहून् ग्रन्थान् अरचयत् । ते नैषधम्, कूर्मपुराणाम्, लिङ्गपुराणाम्, काशिकाण्डम्, वायुशङ्किता इत्यादयः । अयं क्रि.परं 11 वा 12 शताब्दीयः इति समलोचकाः कथयन्ति ।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. विद्या - ____________________
2. दोषः - ____________________
3. धनिकः - ____________________
4. बन्धुः - ____________________
5. नीतिः - ____________________


unit 1.indd 2 21-03-2019 10:02:21

6. कार्यम् - ________________

7. कृषकः - ________________

8. जीवनम् - ________________

9. भोजनम् - ________________

10. मन्त्री - ________________

11. यशः - ________________

12. दरिद्रः - ________________

13. अतिथिः - ________________

14. कालः - ________________

15. व्यापारी - ________________

## II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. दैवः × ________________

2. दोषः × ________________

3. धनिकः × ________________

4. सामर्थ्यम् × ________________

5. बन्धुः × ________________

6. रक्षणम् × ________________

7. नीतिः × ________________

8. जीवनम् × ________________

9. अस्ति × ________________

10. पण्डितः × ________________

11. यशः × ________________

12. शीलम् × ________________



unit 1.indd 3 21-03-2019 10:02:21

## III. पाठात् समुचितं पदं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. यस्तु विद्यां प्रयच्छति, ________ ________ ।
2. धनिकानां तु ________ ________ कुलरक्षणे ।
3. ________ ________ अह्रासधनवर्धनम् ।
4. लक्षणम् अस्ति मन्त्रिणां ________ ।
5. ________ भवेन्नित्यं ________ स्वस्थितावपि ।

## IV. मातृभाषायाम् अनुवादं कुरुत–

1. सौष्ठवम् अस्ति विद्यायाः दोषराहित्यभाषणम् ।
2. धनिकानां तु सामर्थ्यं, स्वबन्धुकुलरक्षणे ।
3. व्यापारिणां सकार्यं तु , अह्रासधनवर्धनम् ।
4. शमयुक्तं हि पाण्डित्यं, पण्डितानां यशस्करम् ।
5. भोजनं कथ्यते तद्वै, अतिथिना सहाशने ।

## V. सविस्तरम् उत्तरं लिखत-

1. द्रविडसुभाषितात् पञ्च वाक्यानि सानुवादं लिखत ।

********************************

### पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

- संघे शक्तिः कलौ युगे ।
- श्रमेण सिद्धिं लभते मनुष्यः ।
- बुभुक्षितः किं न करोति पापम् ।
- चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च ।
- जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।
- उदारचरितानां तु वसुधैव कुटुम्बकम् ।
- विद्वान् सर्वत्र पूज्यते ।
- विनाशकाले विपरीतबुद्धिः ।

समानान्तरश्लोकः

सभागतातिथीन्पुरा प्रभोज्य शिष्टमश्नतः ।
न बीजवापसंस्क्रियमपेक्षते वसुंधरा ।।



unit 1.indd 4 21-03-2019 10:02:21

## पाठ्यातिरिक्तः व्याकरणविषयः

### विशेषण – विशेष्यसूचकानि पदानि

| पुंलिङ्गम् | |
|---|---|
| विशेषणम् | विशेष्यम् |
| चतुरः | बालकः |
| हरितः | वृक्षः |
| कुरूपः | दानवः |
| कुशलः | जनः |
| धनवान् | मनुष्यः |
| प्रसन्नः | पुत्रः |
| स्वस्थः | शिशुः |
| कृष्णः | मेघः |

| स्त्रीलिङ्गम् | |
|---|---|
| विशेषणम् | विशेष्यम् |
| सुन्दरी | नारी |
| चपला | बालिका |
| निर्धना | महिला |
| विशाला | शाला |
| कृष्णा | धेनुः |
| पुष्पिता | लता |
| स्वस्थाः | बालिकाः |
| दुर्बला | वृद्धा |

| नपुंसकलिङ्गम् | |
|---|---|
| विशेषणम् | विशेष्यम् |
| श्वेतं | कमलम् |
| सुन्दरं | पुस्तकम् |
| शीतलं | जलम् |
| विकसितं | पुष्पम् |
| मलिनं | वस्त्रम् |
| कृष्णं | धनम् |
| सुन्दराणि | चित्राणि |
| नीलं | गगनम् |



unit 1.indd 5 21-03-2019 10:02:21

## कारकपरिचयः

| विभक्तिः | कारकम् | वाक्यम् |
|---|---|---|
| प्रथमा | कर्ता | छात्रः लिखति । |
| द्वितीया | कर्म | सः पत्रं लिखति । |
| तृतीया | करणम् | सः कलमेन लिखति । |
| चतुर्थी | सम्प्रदानम् | अहं गुरवे पुष्पाणि आनयामि । |
| पञ्चमी | अपादानम् | वृक्षात् पत्राणि पतन्ति । |
| षष्ठी | सम्बन्धः | रामः दशरथस्य सुतः । |
| सप्तमी | अधिकरणम् | वृक्षे वानराः सन्ति । |
| संबोधन- प्रथमा | संबोधनम् | हे राम! अत्र आगच्छ । |

### कर्तृकारकम्

1. वानरः खादति ।
2. सः पठति ।
3. तौ धावतः ।
4. महिलाः गच्छन्ति ।
5. सैनिकः रक्षति ।

### कर्मकारकम्

1. बालकः शुकं पश्यति ।
2. नरः भोजनं खादति ।
3. महिला लतां सिञ्चति ।
4. रामः फलं खादति ।
5. माता भोजनं पचति ।

### करणकारकम्

1. वृद्धः दण्डेन चलति ।
2. बालकः कन्दुकेन क्रीडति ।
3. गजाः पादैः चलन्ति ।
4. जनाः मुखेन खादन्ति ।
5. नृपः हस्ताभ्यां ददाति ।

### सम्प्रदानकारकम्

1. सा छात्राय पुस्तकं ददाति ।
2. सः पठनाय विद्यालयं गच्छति ।
3. नृपः याचकाय धनं यच्छति ।
4. माता पुत्राय दुग्धं ददाति ।
5. अध्यापकः छात्रेभ्यः ज्ञानं प्रयच्छति ।

### अपादानकारकम्

1. वृक्षात् पत्राणि पतन्ति ।
2. लतायाः पुष्पाणि पतन्ति ।
3. हिमालयात् गङ्गा प्रवहति ।
4. पथिकः गृहात् आगच्छति ।
5. वानराः भवनात् अवतरन्ति ।

### सम्बन्धे षष्ठी

1. कूपस्य जलं मधुरम् अस्ति ।
2. इदं पुस्तकं रामस्य अस्ति ।
3. पिकस्य स्वरः मधुरः भवति ।

### अधिकरणकारकम्

1. पादपे फलानि सन्ति ।
2. पुष्पेषु भ्रमराः सन्ति ।
3. सः कटे उपविशति ।
4. वने सिंहः अस्ति ।
5. गृहेषु जनाः सन्ति ।

### संबोधनकारकम्

1. हे देव ! रक्षां कुरु
2. हे राम ! अत्र आगच्छ ।
3. हे मेघ ! जलं देहि ।



unit 1.indd 7 21-03-2019 10:02:21

Lesson 2

# द्वितीयः पाठः
# लोहमान्यः लोकमान्यः च

भारतवासिनः वयं अद्य स्वतन्त्रवायुं श्वसिमः चेत्, तत्र कारणम् अस्माकं पूर्वजानां त्यागः एव। ते स्वातन्त्र्यार्थं बहुधा परिश्रमं कृत्वा अहिंसामाध्यमेन कार्यं कृतवन्तः । तेषु सर्दार् वल्लभाय् पटेल् एवं बालगङ्गाधरतिलकश्च प्रामुख्यौ भवतः । तौ अधिकृत्यैव परिचयः अस्मिन् पाठ्यभागे प्रदत्तः ।

## लोहमान्यः



सर्दार् वल्लभाय् पटेल्

सर्दार् वल्लभाय् पटेल् नामकः 1875 तमे वर्षे अक्टोबर् मासे 31 तमे दिनाङ्के गुजरात् प्रान्ते जनिम् अलभत । द्वाविंशतिवर्षे समाप्तविद्यः सः न्यायवादी भवितुम् इंग्लाण्ड् गत्वा न्यायपाठम् अपठत् । ततः गुजरात् प्रान्ते न्यायवादी भूत्वा आंगलेयानां विरोधे स्वातन्त्र्याय धर्मान्दोलनं कृतवान् ।

ततः स्वातन्त्र्यानन्तरं भारतस्य प्रप्रथमतया उपप्राधानमन्त्रित्वेन, अन्तर्विभागमन्त्रित्वेन च अलङ्कृतः असौ भारतम् एकत्रीकृतः शिल्पकारः आसीत् । अयं पञ्चशताधिकानि राज्यानि संयुज्य अद्यतनं समग्रं भारतम् अजनयत्। तेन अयं भारतस्य लोहपुरुषः इति प्रशस्तिम् अलभत। अयं 1950 तमे वर्षे डिसम्बर् मासे मृतवान् ।



unit 2.indd 8 21-03-2019 10:04:05

अमुं गौरवितुं भारतसर्वकारेण 1991 तमे वर्षे भारतरत्ना इति विरुदं प्रदत्तम् । अस्य स्मारकप्रकल्पनाय गुजरात् प्रान्ते एव नर्मदातीरे पटेल् महाभागस्य अनितरां 182 पदौन्नत्यघटितां प्रतिमां तस्य 143 तमे जन्मोत्सवे भारतसर्वकारः अस्थापयत् ।

## लोकमान्यः



बालगङ्गाधरतिलकः

बालगङ्गाधरतिलकः 1856 तमे वर्षे जूलै मासे 23 तमे दिनाङ्के भारतस्य महाराष्ट्रप्रान्ते रत्नगिरिमण्डले जनिम् अलभत । अयं बाल्ये संस्कृतेन साकं गणितम् अपठत् । ततः गणिते उच्चशिक्षां समाप्य न्यायपाठम् अपठत् । बाल्यादेव तस्य मनसि देशसेवाभावना प्रादुर्भूता। सः आंगलेयशासनम् असहमानः 1881 तमे वर्षे केसरी नाम मराठा पत्रिकां, मराठा नाम आंगलपत्रिकां च समारब्धवान्। तत्र आंगलेयानां कुनीतिं सुतीक्षणं विममर्श । तेन आंगलेयजनेन दण्डं प्रापितः सः भारतीयैः लोकमान्यः इत्युद्घोषितः ।

ततः वङ्गप्रदेशवासिनां कृत्यं समर्थयन् स्वस्य केसरी पत्रिकायाम् आंगलेयान् विममर्श । तेन ते तिलकमहाशयं षड्वर्षाणि यावत् बर्मायाः कारागृहे अस्थापयन् । तदा सः गीतारहस्यम् इत्यादीन् ग्रन्थान् अरचयत् ।

स्वातन्त्र्यं नाम अस्माकं जन्मसिद्धः अधिकारः इति उद्घोषितेन तेन 1920 तमे वर्षे अगस्त् मासे प्रथमे दिनाङ्के पञ्चत्वं गतम् ।।



unit 2.indd 9 21-03-2019 10:04:05

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. जनिम् - ________________
2. न्यायवादी - ________________
3. स्वतन्त्राय - ________________
4. धर्मान्दोलनम् - ________________
5. उपप्रधानमन्त्री - ________________
6. अन्तर्विभागमन्त्री - ________________
7. शिल्पकारः - ________________
8. राज्यानि - ________________
9. संयुज्य - ________________
10. लोहपुरुषः - ________________
11. तीरे - ________________
12. भावना - ________________
13. कुनीतिः - ________________
14. सुतीक्षणम् - ________________
15. पञ्चत्वम् - ________________

### II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. विरोधे × ________________
2. संयुज्य × ________________
3. अद्यतनम् × ________________
4. प्रशस्तिः × ________________



unit 2.indd 10 21-03-2019 10:04:05

5. असहमानः × ______________________

6. कुनीतिम् × ______________________

7. समर्थयन् × ______________________

8. पञ्चत्वम् × ______________________

## III. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. लोहमान्यः कः ?
2. सर्दार् वल्लभाय् पटेल् कदा जनिम् अलभत् ?
3. सर्दार् वल्लभाय् पटेल् किं भवितुम् इंग्लाण्ड् गतवान् ?
4. सर्दार् वल्लभाय् पटेल् कस्य विरोधे धर्मान्दोलनम् अकरोत् ?
5. सर्दार् वल्लाभाय् पटेल् कस्यां पदव्यां अलङ्कृतः ?
6. सर्दार् वल्लभाय् पटेल् कथं समग्रं भारतम् अजनयत् ?
7. सर्दार् वल्लभाय् पटेल् स्मारकप्रकल्पनाय भारतसर्वकारः किम् अस्थापयत् ?
8. लोकमान्यः कः ?
9. बलगङ्गाधारतिलकः कुत्र जनिम् अलभत?
10. बालगङ्गाधरतिलकः बाल्ये केन साकं गणितं अपठत्?
11. बालगङ्गाधरतिलकः कस्याम् आंगलेयान् विममर्श?
12. बालगङ्गाधरतिलकः किम् उद्धोषितवान्?

## IV. सविस्तरम् उत्तरं लिखत-

1. सर्दार् वल्लभाय् पटेल् अधिकृत्य संक्षिप्य लिखत ।
2. लोकमान्यः कः? सः किं कृतवान्? – विवृणुत ।

********************************



unit 2.indd 11 21-03-2019 10:04:05

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

न यत्र देशोद्धृतिकामनाऽस्त्रे
न मातृभूमेर्हितचिन्तनं च ।
न राष्ट्ररक्षा बलिदानभावः
श्मशानतुल्यं नरजीवनं तत् ।।

रामायण – महाभारत – पुराणादिषु स्वदेशगौरवं देशभक्तिश्च बहुधा कीर्त्यते।

स्वदेश भक्ति – भावनयैव प्रेरिता शतशो महात्मानः शूराः वीराश्च सर्वस्वं विहायापि देशरक्षणं व्यदधुः ।

केचन च देशोन्नतौ स्वीयान् असून् तृणवत् उज्झांचक्रुः ।

देशभक्तिः मानवानां सर्वोत्कृष्टं कर्तव्यम् ।

यत्र न संचरति, न प्रवहति च देशभक्तिधारा तत् जीवनं शुष्कसरिदेव भवति ।

अत एव मातृभूमिस्तुतौ प्रत्यहं गीयते-

- वन्दे मातरम् ।
- सुजलां सुफलां मलयजशीतलाम्
- शस्य – श्यामलां मातरम् वन्दे मातरम् ।

भारतभूमिः अस्माकं जननी ।

तत् पुत्रत्वेन मातुः रक्षणम् अस्माकं परं कर्तव्यम् ।



unit 2.indd 12 21-03-2019 10:04:05

## व्याकरण-अभ्यासः - 1

### अजन्तपुल्लिङ्गशब्दाः

### उकारन्तः पुल्लिङ्गः "गुरु" शब्दः ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गुरुः | गुरू | गुरवः |
| द्वितीया | गुरुम् | गुरू | गुरून् |
| तृतीया | गुरुणा | गुरुभ्याम् | गुरुभिः |
| चतुर्थी | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| पञ्चमी | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी | गुरौ | गुर्वोः | गुरुषु |
| सम्बोधन-प्रथमा | हे गुरो ! | हे गुरू ! | हे गुरवः ! |

### उकारान्तः पुल्लिङ्गः "शम्भु" शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | शम्भुः | शम्भू | शम्भवः |
| द्वितीया | शम्भुम् | शम्भू | शम्भून् |
| तृतीया | शम्भुना | शम्भुभ्याम् | शम्भुभिः |
| चतुर्थी | शम्भवे | शम्भुभ्याम् | शम्भुभ्यः |
| पञ्चमी | शम्भोः | शम्भुभ्याम् | शम्भुभ्यः |
| षष्ठी | शम्भोः | शम्भ्वोः | शम्भूनाम् |
| सप्तमी | शम्भौ | शम्भ्वोः | शम्भुषु |
| सम्बोधन-प्रथमा | हे शम्भो ! | हे शम्भू ! | हे शम्भवः ! |



unit 2.indd 13 21-03-2019 10:04:05

## उकारन्तः पुल्लिङ्गः "तरु" शब्दः ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | तरुः | तरू | तरवः |
| द्वितीया | तरुम् | तरू | तरून् |
| तृतीया | तरुणा | तरुभ्याम् | तरुभिः |
| चतुर्थी | तरवे | तरुभ्याम् | तरुभ्यः |
| पञ्चमी | तरोः | तरुभ्याम् | तरुभ्यः |
| षष्ठी | तरोः | तर्वोः | तरूणाम् |
| सप्तमी | तरौ | तर्वोः | तरुषु |
| सम्बोधन-प्रथमा | हे तरो ! | हे तरू ! | हे तरवः ! |

## उकारन्तः पुल्लिङ्गः "वेणु" शब्दः ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वेणुः | वेणू | वेणवः |
| द्वितीया | वेणुम् | वेणू | वेणून् |
| तृतीया | वेणुना | वेणुभ्याम् | वेणुभिः |
| चतुर्थी | वेणवे | वेणुभ्याम् | वेणुभ्यः |
| पञ्चमी | वेणोः | वेणुभ्याम् | वेणुभ्यः |
| षष्ठी | वेणोः | वेण्वोः | वेणूनाम् |
| सप्तमी | वेणौ | वेण्वोः | वेणुषु |
| सम्बोधन-प्रथमा | हे वेणो ! | हे वेणू ! | हे वेणवः ! |



unit 2.indd 14 21-03-2019 10:04:05

Lesson 3

तृतीयः पाठः

# सौन्दर्यगीतम्

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती इत्युक्तिः संस्कृतस्य औन्नत्यं कथयति। सत्यमेव हि तत् संस्कृतं तु न केवलं कस्यचित् देशस्य भाषा। अपि तु इयं भाषा विश्वभाषात्वेन परिगण्यते। तत्र कारणं किं स्यादिति प्रश्ने कृते तदुत्तरत्वेन अयं पाठः समुपस्थापितः विद्यते।।




सरला सरसा संस्कृतवाणी जयति मङ्गला संस्कृतवाणी ।
वेदहिमाद्रैश्विरं वहन्ती विमला गङ्गा कल्याणी ।।
अङ्गानां धाराभिरुदारा उपनिषदामपि निहितविचारा ।
दर्शन- तन्त्र – पुराण – स्मृतिततिः काव्य – कथा – नाटक – परिवारा ।
सूक्ति – सुधा – पानं भुवि कुर्वन् भवति सुखी सकलः प्राणीम् ।।

अतुलो यस्याः शब्दागारः शास्त्राणां विपुलो विस्तारः ।
नीचैरुच्चैरभितः परितः शुद्धा क्वापि न तत्र विकारः ।।
चिन्तन – मनन – निदिध्यासनतो विज्ञानानां निर्माणी ।।
ज्ञानं मानवतायाः वितरति, विश्वप्रेम दिशन्ती विहरति ।
समता – ममता – समादराणां भावः प्रतिजन – हृदयं प्रसरति ।
वन्दे तां संयोज्य भक्तिनो विनतशिराः स्वीयौ पाणी ।।
जयति मङ्गला संस्कृतवाणी



unit 3.indd 15 21-03-2019 10:05:06

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. सरला - ____________________
2. मङ्गला - ____________________
3. वाणी - ____________________
4. विमला - ____________________
5. भुवि - ____________________
6. हिमाद्री - ____________________
7. सुखी - ____________________
8. परितः - ____________________
9. ज्ञानम् - ____________________
10. मानवः - ____________________
11. विश्वम् - ____________________
12. प्रेमम् - ____________________
13. हृदयम् - ____________________
14. वन्दे - ____________________
15. शिरः - ____________________

### II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. दर्शनम् × ____________________
2. सुखी × ____________________
3. अतुलः × ____________________
4. विस्तारः × ____________________
5. नीचैः × ____________________
6. ज्ञानम् × ____________________



unit 3.indd 16 21-03-2019 10:05:06

### III. सन्धिच्छेदं कुरुत-

1. हिमाद्रैश्चिरम् - ________ + ________
2. उपनिषदामपि - ________ + ________
3. शब्दागारः - ________ + ________
4. नीचैरुच्चैः - ________ + ________

### IV. श्लोकं पूरयत-

1. सरला सरसा संस्कृतवाणी जयति ________ ________ ।

   ________________ विमला गङ्गा कल्याणी ।।

2. दर्शन – तन्त्र-पुराण-स्मृतिततिः ________ ________ ________ ।

   ________ ________ भवति सुखी सकलप्राणी ।।

3. समता ममता समादराणां भावः ________ ________

   ________ ________ विनतशिराः स्वीयौ पाणी।।

### V. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. कीदृशी संस्कृतवाणी जयति ?
2. संस्कृतवाणी कैः चिरं वहन्ति ?
3. संस्कृतवाणी कस्यामपि निहितविचारा ?
4. संस्कृतवाणी कथं सुखी भवति ?
5. संस्कृतवाण्याः शब्दागारः कीदृशः ?
6. संस्कृतवाणी कथं शुद्धा भवति ?
7. संस्कृतवाणी केषां निर्माणी ?
8. ज्ञानं कस्याः वितरति ?
9. प्रतिजनहृदयं कः प्रसरति ?
10. संस्कृतवाणीं कथं वन्दे ?



unit 3.indd 17 21-03-2019 10:05:06

## VI. सविस्तरम् उत्तरं लिखत-

1. संस्कृतवाण्याः महत्वं यथाग्रन्थं लिखत ।

*********************************

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

हस्ते स्फाटिकमालिकाम् विदधतीं पद्मासने संस्थिताम् ।
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् । 1

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ।। 2

लक्ष्मीर्मेधा धरापुष्टिः गौरी तुष्टिः प्रभा धृति ।
विद्याः ददातु एभिस्तनुभिः अष्टाभिर्मां सरस्वती ।। 3

ज्ञानविरागविवेकविधाने, निगमागमरूपिणि शान्तिनिधाने ।
दूरीकुरु मयि दुष्कृतभारं कुरु कृपा भवसागरपारम् ।। 4

सर्वस्वरूप सर्वेश सर्वशक्तिसमन्वित ।
सर्वपालक सर्वज्ञ प्रसीद परमेश्वर।। 5

परमेशः पिताऽस्माकं जननी तु वसुन्धरा ।
वयं सर्वे तयोः पुत्राः नमामस्तौ नताः सदा ।। 6

### पाठ्यातिरिक्तः व्याकरणविषयः

#### उपपदविभक्तीनां प्रयोगः

विभक्तीनां विभागः द्विधा कर्तुं शक्यः । 1. कारकविभक्तिः 2. उपपदविभक्तिः । या विभक्तिः क्रियापदमनुसृत्य उपयुज्यते सा कारकविभक्तिः । या यत्र विशेषपदनिमित्तं सामान्यकारकविभक्तिं विना अन्या विभक्तिः प्रयुज्यते, तत्र सा उपपदविभक्तिः इति कथ्यते ।।

#### द्वितीया – उपपदविभक्तिः

| उपपदम् | उदाहरणम् |
|---|---|
| अभितः | अध्यापकम् अभितः छात्राः सन्ति । |
| उभयतः | नगरम् उभयतः उद्याने स्तः । |

| | |
|---|---|
| परितः | सूर्यं परितः ग्रहाः भ्रमन्ति । |
| सर्वतः | उपवनं सर्वतः जनाः भ्रमन्ति । |
| प्रति | कृष्णः गृहं प्रति गच्छति । |
| विना | विद्यां विना जीवनं न लभते । |
| समया / निकषा | विद्यालयं निकषा कूपः अस्ति । |
| धिक् | धिक् असत्यवादिनम् । |
| विना / ऋते | ज्ञानं विना मुक्तिः न भवति । |

### तृतीया

| उपपदम् | उदाहरणम् |
|---|---|
| विना | परिश्रमेण विना जनः सफलतां न लभते । |
| हीनः | ज्ञानेन हीनः जनः पशुः भवति । |
| अलम् | अलं विवादेन । |
| साकम् / सह /सार्धम् | पिता पुत्रेण सह क्रिडति । |
| सदृशः | अर्जुनेन सदृशः वीरः नास्ति । |
| प्रयोजनम् | दुष्टस्य परोपकारेण किं प्रयोजनम् ? |

### चतुर्थी

| उपपदम् | उदाहरणम् |
|---|---|
| अलम् | भारतीयसेना शत्रुदेशेभ्यः अलम् । |
| नमः | शिवाय नमः । |
| स्वाहा | इन्द्राय स्वाहा । |
| स्वस्ति | प्रजाभ्यः स्वस्ति । |
| ईर्ष्य् | दुष्टः सज्जनाय ईर्ष्यति । |

### पञ्चमी

| उपपदम् | उदाहरणम् |
|---|---|
| विना / ऋते | धनात् विना / ऋते सुखं नास्ति । |

| | |
|---|---|
| बहिः | नगरात् बहिः काननम् अस्ति। |
| पूर्वम् | मत् पूर्वं रामः तिष्ठति। |
| अनन्तरम् | कृष्णः पठनात् अनन्तरं खादति। |
| परः | सोमवासरात् परः मंगलवासरः भवति। |

### षष्ठी

| उपपदम् | उदाहरणम् |
|---|---|
| अधः | वृक्षस्य अधः मयूरः नृत्यति। |
| पुरतः | देवालयस्य पुरतः कूपः अस्ति। |
| अग्रे | रमायाः अग्रे गीता तिष्ठति। |
| उपरि | वृक्षस्य उपरि खगः वसति। |
| दक्षिणतः | मम गृहस्य दक्षिणतः चित्रशाला अस्ति। |
| वामतः | सदा मार्गस्य वामतः चलनीयम्। |
| पृष्ठतः | रक्तदुर्गस्य पृष्ठतः यमुना वहति स्म। |
| निर्धारणे | गायिकानां सीता श्रेष्ठतमा अस्ति। |
| स्मृ | शिशुः मातुः स्मरति। |

### सप्तमी

| उपपदम् | उदाहरणम् |
|---|---|
| कुशलः | अश्वः धावने कुशलः जन्तुः। |
| चतुरः | लता पाककलायां चतुरा अस्ति। |
| प्रवीणः | कमला श्लोकगायने प्रवीणा अस्ति। |
| दक्षः | अमरः लेखने दक्षः अस्ति। |
| निपुणः | हरिणी नृत्ये निपुणः अस्ति । |
| पटुः | गोविन्दः व्यवहारे पटुः अस्ति। |
| पण्डितः | सुब्रह्मण्यः गायने पण्डितः अस्ति । |
| निर्धारणे | छात्रासु विमला श्रेष्ठतमा भवति। |



unit 3.indd 20 21-03-2019 10:05:07

Lesson 4 चतुर्थः पाठः

# कविश्रेष्ठाः

धर्मस्य तत्वं निहितं गुह्यायाम् इत्युक्तिः वर्तते । ये तत्वज्ञानाय महान्तः ऋषयः प्रायतन्त, तेषु वाल्मीक्यादयः ऋषयः स्वकाव्येषु जनान् अवबोधयितुं धर्मस्य सारम् अलिखन् । विशिष्य कालिदासादि – कवयः स्वविशिष्टचिन्तनपुरस्सरं कथामाध्यमेन धर्मं संबोध्य जनान् आकर्षयन्ति स्म । अतः अस्मिन् पाठ्यभागे कतिपयेषां कवीनां परिचयः दीयते ।।

## माघः



माघः संस्कृतकविषु अन्यतमः महाकविः । अस्य पिता दत्तकः । पितामहस्तु सुप्रभः । षष्ठमशतकात् सप्तमशतकपर्यन्तम् अस्य कालः इति अनुमीयते । अयं भीनमालानामके ग्रामे अवसत् इति केचन वदन्ति । अनेन शिशुपालवधम् इति महाकाव्यं विरचितम् । अस्य कथावस्तु महाभारतात् संगृहीतम् । कालिदासः सुविस्तृतां कथामादाय काव्यरत्नं प्रणीतवान् । भारविस्तु तदपेक्षया स्वल्पतरां कथामाश्रित्य महाकाव्यं विरचितवान् । माघः ततोऽपि स्वल्पतरां कथां गृहीतवान् । अयं सकलशास्त्रज्ञः । अयम् उपमायां, अर्थगौरवे, पदलालित्ये च समर्थः आसीत् । अत एवोक्तम् – "माघे सन्ति त्रयो गुणाः" इति ।



unit 4.indd 21 21-03-2019 10:06:03

## श्रीहर्षः



महाकवेः श्रीहर्षस्य जनकः श्रीहीरः, जननी मामल्लदेवी च। अयं कन्याकुब्जेश्वरस्य जयचन्द्रस्य सभापण्डितः आसीत् । अतः अस्य कालः द्वादशशताब्द्याः उत्तरार्धः इत्युच्यते। कदाचित् अस्य पिता वादे उदयनाचार्येण पराजितः सन् पञ्चत्वं गतः । तेन दुःखितः श्रीहर्षः सरस्वतीं संसेव्य तस्याः प्रसादेन उदयनाचार्यम् अजयत्। अयं पञ्चमहाकाव्येषु अन्यतमं नैषधीयचरितम् इति ग्रन्थम् अरयत् । नलदमयन्त्योः कथा अत्र वर्णिता। तस्य भाषा अत्यन्तं प्रौढा दृश्यते। विद्वत्तल्लजानामपि कृते नैषधं दुर्बोधं भवति। अत्र अनेकेषां शास्त्रादीनां सिद्धान्तान् अवर्णयत्। अत एवोक्तम् - "नैषधं विद्वदौषधम्" इति ।

## बाणः





unit 4.indd 22 21-03-2019 10:06:04

महाकविः बाणभट्टः काव्यचक्रवर्ती भवति । अस्य जनकः चित्रभानुः जननी राजदेवी च । अस्य कालः ईसवीय सप्तमशताब्द्याः पूर्वार्धः इत्युच्यते। गद्यकाव्यरचनायाम् अयम् अतीव निपुणः आसीत् । अयं महाराजस्य हर्षवर्धनस्य सभापण्डितः आसीत् । अत एव सः हर्षचरितम् इति ग्रन्थम् अरचयत् । अपि च असौ कादम्बरी, चण्डीशतकम्, पार्वतीपरिणयनाटकं च इति ग्रन्थान् अलिखत् । अस्य वर्णनशक्तिः अत्यद्भुता व्यापकता च विद्यते । एतेन भाषाप्रयोगः, अलङ्काराणां विनियोगः च सम्यक् कृतः । न कोऽपि अन्यः कविः बाणवत् वर्णयितुं शक्यते। अत एवोक्तम् – "बाणोच्छिष्टं जगत्सर्वम्" इति ।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. अन्यतमः - ____________
2. पितामहः - ____________
3. कथावस्तु - ____________
4. तदपेक्षया - ____________
5. समर्थः - ____________
6. सभा - ____________
7. पराजितः - ____________
8. पञ्चत्वम् - ____________
9. संसेव्य - ____________
10. प्रौढा - ____________
11. सिद्धान्तान् - ____________
12. चक्रवर्ती - ____________
13. व्यापकता - ____________
14. सम्यक् - ____________
15. विनियोगः - ____________



unit 4.indd 23 21-03-2019 10:06:04

## II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

| | | | |
|---|---|---|---|
| 1. | केचन | × | ____________ |
| 2. | अपेक्षया | × | ____________ |
| 3. | स्वल्पतराम् | × | ____________ |
| 4. | समर्थः | × | ____________ |
| 5. | उत्तरार्धः | × | ____________ |
| 6. | दुःखितः | × | ____________ |
| 7. | दुर्बोधः | × | ____________ |
| 8. | शक्तिः | × | ____________ |
| 9. | सम्यक् | × | ____________ |
| 10. | शक्यते | × | ____________ |

## III. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. माघस्य पितरौ कौ ?
2. माघेन विरचितं काव्यं किम् ?
3. शिशुपालवधस्य कथावस्तु कस्मात् संगृहीतम् ?
4. माघः कस्मिन् समर्थः आसीत् ?
5. श्रीहर्षः कस्य सभापण्डितः आसीत् ?
6. श्रीहर्षः कस्याः प्रसादेन उदयनाचार्यम् अजयत् ?
7. श्रीहर्षेण विरचितं महाकाव्यं किम् ?
8. बाणस्य कालः कः ?
9. बाणः कस्य सभापण्डितः आसीत्?
10. बाणेन विरचिताः ग्रन्थाः के ?
11. बाणस्य वर्णनशक्तिः कीदृशी ?
12. बाणमधिकृत्य प्रसिद्धा उक्तिः का ?



unit 4.indd 24 21-03-2019 10:06:04

## IV. सविस्तरम् उत्तरं लिखत-

1. माघमधिकृत्य यथाग्रन्थं लिखत।
2. श्रीहर्षमधिकृत्य परिचयं कुरुत।
3. बाणस्य महत्वं वर्णयत।

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

श्रीरामायणभारतबृहत्कथानां कवीन्नमस्कुर्मः।
त्रिस्रोता इव सरसा सरस्वती स्फुरति यैर्भिन्ना ।।
प्राचेतसव्यासपराशराद्याः प्राञ्चः कवीन्द्रा जगदञ्चितास्ते।
गोष्ठी नवीनापि महाकवीनां पूज्या भुवनोपकर्त्री ।।
धन्वन्तरिक्षपणकामरसिंहशङ्कु-
    वेतालभट्टघटखर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
    रत्नानि वै वररुचिर्नव विक्रमस्य ।।
यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो
भासो हासः कविकुलगुरुः कालिदासो विलासः।
हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः
केषां नैषा कथय कविताकामिनी कौतुकाय ।।
माघश्चोरो मयूरो मुररिपुरपरो भारविः सारविद्यः
श्रीहर्षः कालिदासः कविरथ भवभूत्याह्वयो भोजराजः।
श्रीदण्डी डिण्डिमाख्यः श्रुतिमुकुटशम्भुर्भल्लटो भट्टबाणः
ख्याताश्चान्ये सुबन्ध्वादय इह कृतिभिर्विश्वमाह्लादयन्ति ।।



unit 4.indd 25 21-03-2019 10:06:04

## व्याकरण-अभ्यासः - 2

### धातुः – परस्मैपदी - लृट्  (Future Tense)

#### पठ् – to read

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |

#### गम् (गच्छ्) – to go

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमपुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः |

#### लिख् – to write

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | लेखिष्यति | लेखिष्यतः | लेखिष्यन्ति |
| मध्यमपुरुषः | लेखिष्यसि | लेखिष्यथः | लेखिष्यथ |
| उत्तमपुरुषः | लेखिष्यामि | लेखिष्यावः | लेखिष्यामः |



unit 4.indd   26

21-03-2019   10:06:04

Lesson 5 पञ्चमः पाठः

# सुभाषितानि

लोके मानवाः सदाचारिणः भवितुं धर्माचरणं कर्तुं च रामायणादि बहवः ग्रन्थाः सन्ति । तत्र बहवः धर्माः उपदिष्टाः । मानवाः तान् समग्रान् ग्रन्थान् पठितुं न शक्नुवन्ति इत्यतः तत्र तत्र प्रत्युक्तान् विषयान् अस्मिन् पाठे उदाह्रियन्ते ।।




## काव्यम् -

कविः करोति काव्यानि लालत्युत्तमो जनः।
तरुः प्रसूते पुष्पाणि वायुर्वहति सौरभम् ।। 1

## विद्या -

नास्ति विद्यासमो बन्धुर्नास्ति विद्यासमः सुहृत् ।
नास्ति विद्यासमं वित्तं नास्ति विद्यासमं सुखम् ।। 2

## परोपकारः -

रविश्चन्द्रो घना वृक्षाः नद्यो गावश्च सज्जनाः।
एते परोपकाराय विरिञ्चेन विनिर्मिताः ।। 3



unit 5.indd 27 21-03-2019 10:10:30

## जीवितम् -

यस्य मित्राणि मित्राणि शत्रवः शत्रवस्तथा ।
अनुकम्प्योऽनुकम्प्यश्च सफलं तस्य जीवितम् ।। 4

## संतोषः -

अकिञ्चनस्य दान्तस्य शान्तस्य समचेतसः ।
सदा संतुष्टमनसः सर्वाः सुखमया दिशः ।। 5

## मौनम् -

पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम् ।
मौनिनः कलहो नास्ति न भयं चास्ति जाग्रतः ।। 6

## लोभः -

लोभात्क्रोधः प्रभवति क्रोधाद्द्रोहः प्रवर्तते ।
द्रोहेण नरकं याति तस्माल्लोभं परित्यजेत् ।। 7

## कलिः -

परान्नेन मुखं दग्धं हस्तौ दग्धौ प्रतिग्रहात् ।
परस्त्रीभिर्मनो दग्धं कुतः शापः कलौ युगे ।। 8

## सत्संगतिः -

कीटोऽपि सुमनः सङ्गादारोहति सतां शिरः ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ।। 9

## कृपणः -

कृपणेन समो दाता न भूतो न भविष्यति ।
अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छति ।। 10



unit 5.indd 28 21-03-2019 10:10:30

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. तरुः - ______________________
2. सौरभम् - ______________________
3. बन्धुः - ______________________
4. वित्तम् - ______________________
5. घनाः - ______________________
6. गावः - ______________________
7. विरिञ्चेन - ______________________
8. दान्तस्य - ______________________
9. पातकम् - ______________________
10. लोभात् - ______________________
11. दग्धम् - ______________________
12. कीटः - ______________________
13. अश्मा - ______________________
14. कृपणेन - ______________________
15. महद्भिः - ______________________

### II. अधो लेखितानां पदानां विरुद्धार्थं लिखत-

1. नित्यम् × ______________________
2. सुहृत् × ______________________
3. सुखम् × ______________________
4. सज्जनाः × ______________________
5. शत्रवः × ______________________
6. सफलम् × ______________________



unit 5.indd 29 21-03-2019 10:10:30

7. मूर्खत्वम् × ____________________

8. क्रोधः × ____________________

9. नरकम् × ____________________

10. अस्पृष्टवान् × ____________________

## III. श्लोकं पूरयत-

1. नास्ति विद्या समो बन्धुः

____________________

नास्ति विद्यासमं वित्तं

____________________

2. ____________________

शत्रवः शत्रवस्तथा।

____________________

सफलं तस्य जीवितम्।

3. लोभात्क्रोधः प्रभवति

____________________

द्रोहेणे नरकं याति

____________________

4. ____________________

आरोहति सतां शिरः।

____________________

महद्भिः सुप्रतिष्ठितः॥

## IV. सन्धिच्छेदं कुरुत-

1. लालत्युत्तमः - ________ + ________

2. बन्धुर्नास्ति - ________ + ________

3. गावश्च - ________ + ________



unit 5.indd 30 21-03-2019 10:10:30

4. सज्जनाः - ________ + ________

5. चास्ति - ________ + ________

## V. सन्धिं कुरुत-

1. वायुः + वहति = ___________
2. न + अस्ति = ___________
3. रविः + चन्द्रः = ___________
4. क्रोधात् + द्रोहः = ___________
5. कीटः + अपि = ___________

## VI. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. कविः किं करोति ?
2. विद्यासमः किं किं नास्ति ?
3. विरिञ्चेन परोपकाराय के विनिर्मिताः?
4. कस्य जीवितं सफलम् ?
5. सन्तुष्टमनसः दिशः कीदृशः?
6. कस्य पातकं नास्ति?
7. कस्मात् क्रोधः प्रभवति?
8. केन मुखं दग्धम् ?
9. अश्मापि कथं देवत्वं याति?
10. केन समो दाता न भूतो न भविष्यति?

## VII. सविस्तरम् उत्तरं लिखत-

1. विवृणुत- (i) काव्यम् (ii) परोपकारः (iii) सन्तोषः
2. विशदयत - (i) विद्या (ii) मौनम् (iii) सत्संगतिः
3. परिचयं कुरुत - (i) जीवितम् (ii) कलिः (iii) कृपणः

************************************



unit 5.indd 31 21-03-2019 10:10:30

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

आचारः परमो धर्मः आचारः परमं तपः ।
आचारः परमं ज्ञानम् , आचारात् किं न सिध्यति ।।

सुन्दरोऽपि सुशीलोऽपि, कुलीनोऽपि महाधनः ।
शोभते न विना विद्यां, विद्या सर्वस्य भूषणम् ।।

गङ्गायाः सलिलं शुभ्रं शुभ्रं च शशिमण्डलम् ।
साधूनां हृदयं शुभ्रं शुभ्रं सज्जनानां यशः ।।

मातापित्रोर्गुरूणां च पूजा बहुमता मम।
इह युक्तो नरो लोकान् यशश्च महतश्नुते ।।

पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः ।
फलं पापस्य नेच्छन्ति पापं कुर्वन्ति यत्नतः ।।

यस्य नास्ति स्वयं प्रज्ञा, शास्त्रम् तस्य करोति किम् ।
लोचनाभ्याम् विहीनस्य दर्पणः किं करिष्यति ।।

## पाठ्यातिरिक्तः व्याकरणविषयः

### सन्धिपरिचयः

सन्धिः

- अच्सन्धिः (स्वरसन्धिः)
- हल्सन्धिः (व्यञ्जनसन्धिः)
- प्रकृतिभावसन्धिः
- विसर्गसन्धिः
- स्वादिसन्धिः

### हल्सन्धिः

1. श्चुत्व सन्धिः – पूर्वत्र परत्र वा शवर्णः चवर्गान्यतरयोगे सति सकारस्य शवर्णः, तवर्गस्य चवर्गः च आदेशः भवेत् ।
यथा - हरिस् + शेते = हरिश्शेते ।



unit 5.indd 32 21-03-2019 10:10:30

| | | |
|---|---|---|
| 2. ष्टुत्वसन्धिः | – | षकारटवर्गयोर्योगे सति सकारस्य षकारः तवर्गस्य टवर्गः च आदेशः भवति ।<br>यथा – रामस् + षष्ठः = रामषष्ठः । |
| 3. जश्त्वसन्धिः | – | पदान्ते वर्तमानानां झलां स्थाने सवर्णाः जशः स्युः ।<br>यथा - अच् + अन्तः = अजन्तः । |
| 4. अनुनासिकसन्धिः | – | पदान्तस्य यरः अनुनासिके परे सवर्णः अनुनासिकः वा स्यात् ।<br>यथा – तत् + मुरारिः = तन्मुरारिः । |
| 5. अनुस्वारसन्धिः | – | अपदान्तयोः मकारनकारयोः झलि परे, मकारान्तपदस्य हलि परे च अनुस्वारः स्यात् ।<br>यथा – हरिम् + वन्दे = हरिं वन्दे । |
| 6. परसवर्णसन्धिः | – | अपदान्तानुस्वारस्य ययि परे नित्यं परसवर्णः स्यात् ।<br>यथा – अं + कितः = अङ्कितः । |
| 7. पूर्वसवर्णसन्धिः | – | झयः परस्य हकारस्य पूर्वसवर्णो वा स्यात्।<br>यथा – वाक् + हरिः = वाग्घरिः । |
| 8. छत्वसन्धिः | – | झयः परस्य शवर्णस्य छकारो वा स्यात् अमि परि ।<br>यथा– तत् + शिवः = तच्छिवः । |
| 9. चर्त्वसन्धिः | – | खरि परे झलां स्थाने चरः स्युः ।<br>यथा – षड् + शास्त्रम् = षट्शास्त्रम् । |
| 10. सत्वसन्धिः | – | अम्परक – छवि परतः नान्तस्य पदस्य, अम्यपरखयि परतः पुंशब्दस्य च सकारः आगमः स्यात् ।<br>यथा – चक्रिन् + त्रायस्व = चक्रिंस्त्रायस्व । |
| 11. तुगागमसन्धिः | – | अजन्तस्य छकारे परे तुगागमो नित्यं स्यात् ।<br>यथा– राम + छत्रम् = रामच्छत्रम् । |



unit 5.indd 33 21-03-2019 10:10:30

12. धुडागमसन्धिः – डकारात्परस्य नकारत्परस्य च सस्य धुडागमो वा स्यात् ।
यथा – षड् + सन्तः = षड् ध् सन्तः – षड् त् सन्तः षट्त्सन्तः / षट्सन्तः ।

13. ङमुडागमसन्धिः – ह्रस्वात्परो यो ङम्, तदन्तं यत्पदं, तस्मात्परस्य अचः नित्यं ङमुडागमः स्यात् ।यथा – प्रत्यङ् + आत्मा = प्रत्यङ्ङात्मा ।

## विसर्गसन्धिः

1. पदान्तसकारस्य रेफादेशः । तस्य खरि परे अवसाने च विसर्गः स्यात् ।

   यथा – रामस् + खादति → रामर् खादति = रामः खादति ।
2. विसर्गस्य खरि परे सकारादेशः ।

   यथा - हरिः + तरति = हरिस्तरति ।
3. खर्परकशरि परे वा विसर्गस्य लोपः स्यात् । रामः + स्ताता = रामस्ताता ।

## स्वादिसन्धिः

1. ह्रस्वाकारत्परस्य पदान्तसकारस्य उ इत्यादेशः स्यात् ह्रस्वाकारे, हशि च परे ।

   यथा - रामस् + अर्च्यः → राम उ अर्च्यः = रामोऽर्च्यः ।
2. अवर्णात् परस्य पदान्तसकारस्य अशि परे यादेशः।

   यथा – देवास् + इह = देवाय् + इह = देवायिह ।
3. रेफढकारलोपनिमित्तभूतयोः रेफढकारयोः परतः पूर्वस्य अणः दीर्घः स्यात् ।

   यथा - पुनर् + रमते = पुनारमते ।
4. हलि परे एतत्तदोः सुप्रत्ययस्य नित्यं लोपः स्यात् ।

   यथा - एषस् + रुद्रः = एष रुद्रः ।



unit 5.indd 34 21-03-2019 10:10:30

Lesson 6 षष्ठः पाठः

# सद्वृत्तम्

सताम् आचारः सदाचारः इति निगद्यते । सदाचारपालनेनैव श्रेष्ठत्वं गुणोत्कृष्टत्वं चासाद्यते। आचारेण च संयुक्तः सर्वां सिद्धिम् अधिगच्छति । सदाचारविहीनस्य सर्वाऽपि क्रिया निष्फलैव । चरित्रमेव पुरुषस्य सर्वस्वं भवति। तदेव जीवनस्य सर्वस्वं भवति इत्यतः अस्मिन् पाठ्यभागे कथमाचारः पालनीयः इति उपस्थाप्यते ।।



सतां – सज्जनानां कृतमेव सद्वृत्तमिति कथ्यते । ते यथा आचरणं कुर्वन्ति तथा आचरणीयम् । तेनैव स्वस्थः भवितुं शक्यते ।

पञ्च ज्ञानेन्द्रियाणि अस्मान् विषयेषु नयन्ति । तदा वयम् इन्द्रियवशगाः न भवेयुः । चञ्चलं मनः अनुभ्रमणं न कुर्यात् । अभ्यासेन वैराग्येण च ग्रहणं कुर्यात् ।



unit 6.indd 35 21-03-2019 10:11:36

पूज्यान् गुरुवृद्धाचार्यान् अर्चयेत् । शिरे, कर्णे, नासिकायां पादयोः च तैलनित्यः भवेत् । नासिकां न कुष्णीयात् । दन्तान् न विघट्टयेत् । भूमौ लेखनं न कुर्यात् । नखान् न वादयेत् । तृणं न छिन्द्यात् । पादपं न आरोहेत् ।

अदेशे, अकाले च अन्नं न खादेत् । पर्युषितम् अन्नं न भुञ्जीत । रात्रौ दधि न भुञ्जीत । अतिथिपूजनं कुर्यात् । मनसि, वचसि, कर्मणि च एकार्थता स्यात् । प्रियहितं वचनं ब्रूयात् । सर्वप्राणिषु कारुण्यं प्रदर्शयेत् ।

सत्यं ब्रूयात् । न असत्यं ब्रूयात् । अति सर्वत्र वर्जयेत् । अन्यस्वं न आहरेत् । पापं न कुर्यात्। हिंसां न कुर्यात् । न शत्रुतां कारयेत् । दुष्टैः सह वासं न कुर्यात् । सज्जनानां संङ्गमं कुर्यात् ।

कार्यकालस्य व्ययः  न कुर्यात् । दीर्घसूत्री न भवेत् । न गर्वितः भवेत् । सुखदुःखे च समो भवेत् ।

एवं रूपेण यः सम्यक् अनुतिष्ठति सः दीर्घायुः सन् यशः प्राप्नोति ।।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. सज्जनः - ______________________
2. वयम् - ______________________
3. मनः - ______________________
4. भ्रमणम् - ______________________
5. गुरुः - ______________________
6. वृद्धः - ______________________
7. शिरः - ______________________
8. कर्णः - ______________________
9. नासिका - ______________________
10. अतिथिः - ______________________
11. तृणम् - ______________________
12. अन्नम् - ______________________



unit 6.indd 36 21-03-2019 10:11:36

13. दधि - ______________

14. व्ययः - ______________

15. दुष्टः - ______________

## II. अधो लेखितानां पदानां विरुद्धार्थं लिखत-

1. सद्वृत्तम् × ______________
2. सज्जनः × ______________
3. वयम् × ______________
4. चलम् × ______________
5. गुरुः × ______________
6. वृद्धिः × ______________
7. कारुण्यम् × ______________
8. पापम् × ______________
9. हिंसा × ______________
10. दुष्टः × ______________
11. व्ययः × ______________
12. सत्यम् × ______________
13. सङ्गमम् × ______________
14. शत्रुः × ______________
15. सुखम् × ______________

## III. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. सद्वृत्तं नाम किम् ?
2. कानि अस्मान् विषयेषु नयन्ति?
3. मनसः ग्रहणं कथं कुर्यात्?
4. कान् अर्चयेत् ?
5. नासिकां दन्तान् च किं न कुर्यात्?

6. कदा अन्नं न खादेत्?

7. किं ब्रूयात् ? किं न ब्रूयात्?

8. केषां संगमं कुर्यात्?

9. कस्य व्ययः न कुर्यात्?

10. सुखदुःखे च कथं भवेत्?

## IV. सविस्तरम् उत्तरं लिखत-

1. अस्माभिः कर्तव्यं किम् इति यथाग्रन्थं लेखत।

2. अस्माभिः किं न कर्तव्यं इति यथामति पाठानुसारं विवृणुत।

## V. कोष्ठात् उचितं पदं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. सताम् आचारः ---------------------- (सदाचारः, दुराचारः)

2. सदाचारविहीनस्य क्रिया ---------------- (निष्फला, सफला)

3. चरितमेव पुरुषस्य ------------ सर्वस्वं भवति। (जीवनस्य, मरणस्य)

4. ------------ अस्मान् विषयेषु नयन्ति। (कर्मेन्द्रियाणि, ज्ञानेन्द्रियाणि)

5. ------------ दधि न भुञ्जीत। (प्रातः, रात्रौ)

6. प्रियहितं वचनं ---------------- (ब्रूयात्, न ब्रूयात्)

7. कार्यकालस्य ----------- न कुर्यात्। (व्ययः, सञ्चयः)

**************************



unit 6.indd 38 21-03-2019 10:11:36

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

आचाराल्लभते ह्यायुराचाराल्लभते श्रियम् ।
आचारात् लभते कीर्तिम्, आचारः परमं धनम् ।।

उत्तमः आचारः सदाचारः कथ्यते । जीवने सदाचारस्य अतीव महत्वम् अस्ति ।

छात्राः सदाचारं पालयन्तु । ते शिक्षकान् नमन्तु । समये विद्यालयं गच्छन्तु, परिश्रमेण पाठान् पठन्तु । सर्वे जनाः हितकरं भोजनं कुर्वन्तु, शुद्धं जलं पिबन्तु, देशस्य विकासं चिन्तयन्तु च येन अस्माकं देशस्य उन्नतिः भवेत् ।

हे बालाः !

* यूयं सकलानां जीवानां हितम् आचरत ।
* पीडितस्य सेवां कुरु ।
* देशस्य उत्तमाः नागरिकाः भवत ।
* दरिद्रेभ्यः दानम् यच्छ ।
* प्रतिदिनम् ईश्वरं स्मरत ।
* आलस्यं त्यज ।
* देशस्य गौरवं रक्ष ।
* देशभक्ताः भवाम ।
* सदाचारस्य विषये वेदेषु कथितम् अनुसर ।



unit 6.indd 39 21-03-2019 10:11:36

## व्याकरण-अभ्यासः - 3

### अजन्तस्त्रीलिङ्गशब्दाः

### उकारन्तः स्त्रीलिङ्गः "धेनु" शब्दः ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | धेनुः | धेनू | धेनवः |
| द्वितीया | धेनुम् | धेनू | धेनूः |
| तृतीया | धेन्वा | धेनुभ्यां | धेनुभिः |
| चतुर्थी | धेन्वै - धेनवे, | धेनुभ्यां | धेनुभ्यः |
| पञ्चमी | धेन्वाः - धेनोः | धेनुभ्यां | धेनुभ्यः |
| षष्ठी | धेन्वाः – धेनोः | धेन्वोः | धेनूनाम् |
| सप्तमी | धेन्वाम् – धेनौ | धेन्वोः | धेनुषु |
| सम्बोधन-प्रथमा | हे धेनो ! | हे धेनू ! | हे धेनवः ! |

### उकारन्तः स्त्रीलिङ्गः "तनु" शब्दः ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | तनुः | तनू | तनवः |
| द्वितीया | तनुम् | तनू | तनूः |
| तृतीया | तन्वा | तनुभ्यां | तनुभिः |
| चतुर्थी | तन्वै - तनवे, | तनुभ्यां | तनुभ्यः |
| पञ्चमी | तन्वाः - तनोः | तनुभ्यां | तनुभ्यः |
| षष्ठी | तन्वाः – तनोः | तन्वोः | तनूनाम् |
| सप्तमी | तन्वाम् – तनौ | तन्वोः | तनुषु |
| सम्बोधन-प्रथमा | हे तनो ! | हे तनू ! | हे तनवः ! |



unit 6.indd 40 21-03-2019 10:11:36

## ऊकारन्तः स्त्रीलिङ्गः "वधू" शब्दः ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वधू | वध्वौ | वध्वः |
| द्वितीया | वधूम् | वध्वौ | वधूः |
| तृतीया | वध्वा | वधूभ्यां | वधूभिः |
| चतुर्थी | वध्वै | वधूभ्यां | वधूभ्यः |
| पञ्चमी | वध्वाः | वधूभ्यां | वधूभ्यः |
| षष्ठी | वध्वाः | वध्वोः | वधूनाम् |
| सप्तमी | वध्वाम् | वध्वोः | वधुषु |
| सम्बोधन-प्रथमा | हे वधु ! | हे वध्वौ ! | हे वध्वः ! |

## ऊकारन्तः स्त्रीलिङ्गः "चमू" शब्दः ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | चमू | चम्वौ | चम्वः |
| द्वितीया | चमूम् | चम्वौ | चमूः |
| तृतीया | चम्वा | चमूभ्यां | चमूभिः |
| चतुर्थी | चम्वै | चमूभ्यां | चमूभ्यः |
| पञ्चमी | चम्वाः | चमूभ्यां | चमूभ्यः |
| षष्ठी | चम्वाः | चम्वोः | चमूनाम् |
| सप्तमी | चम्वाम् | चम्वोः | चमुषु |
| सम्बोधन-प्रथमा | हे चमु ! | हे चम्वौ ! | हे चम्वः ! |



unit 6.indd 41 21-03-2019 10:11:36

Lesson 7

# सप्तमः पाठः जलविज्ञानम्

जलम् एव जीवनम् इति उक्त्यनुसारम् अस्माकं जीवने जलस्य आवश्यकता वर्तते । तृष्णायां सत्यां जलेन एव निवारणं भवति । पृथिव्याः जीवानां कृते आवश्यकं तत्वम् जलमस्ति । तत् ज्ञानम् अधिकृत्य अस्मिन् पाठ्यभागे किञ्चित् उक्तम् भवति ।



जलमेकविधं सर्वं पतत्यैन्द्रं नभस्तलात् ।
तत् पतत् पतितं चैव देशकालावपेक्षते ।। 1

शीतं शुचि शिवं मृष्टं विमलं लघु षड्गुणम् ।
प्रकृत्या दिव्यमुदकं भ्रष्टं पात्रमपेक्षते ।। 2

श्वेते कषायं भवति पाण्डरे स्यात्तु तिक्तकम् ।
कपिले क्षारसंसृष्टमूषरे लवणान्वितम् ।। 3



unit 7.indd 42 21-03-2019 10:12:34

कटु पर्वतविस्तारे मधुरं कृष्णमृत्तिके ।
एतत् षाड्गुण्यमाख्यातं महीस्थस्य जलस्य हि ।। 4

यदन्तरिक्षात् पततीन्द्रसृष्टं चोक्तैश्च पात्रैः परिगृह्यतेऽम्भः ।
तदैन्द्रमित्येव वदन्ति धीराः नरेन्द्रपेयं सलिलं प्रधानम् ।। 5

ईषत्कषायमधुरं सुसूक्ष्मं विशदं लघु।
अरूक्षमनभिष्यन्दि सर्वं पानीयमुत्तमम् ।। 6

नद्यः पाषणाविच्छन्नविक्षुब्धाभिहतोदकाः ।
हिमवत्प्रभवाः पथ्याः पुण्याः देवर्षिसेविताः ।। 7

नद्यः पाषाणसिकतावाहिन्यो विमलोदकाः ।
मलयप्रभवा याश्च जलं तास्वमृतोपमम् ।। 8

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. नभस्तलात् - ______________________
2. शुचि - ______________________
3. विमलम् - ______________________
4. लघु - ______________________
5. प्रकृत्या - ______________________
6. कषायम् - ______________________
7. पाण्डरे - ______________________
8. ऊषरे - ______________________
9. अम्भः - ______________________
10. सलिलम् - ______________________
11. पाषाणम् - ______________________
12. सिकता - ______________________



unit 7.indd 43 21-03-2019 10:12:34

## II. अधो लेखितानां पदानां विरुद्धार्थं लिखत-

1. शीतम् × ____________________
2. शिवम् × ____________________
3. विमलम् × ____________________
4. लघु × ____________________
5. श्वेते × ____________________
6. मधुरम् × ____________________
7. धीराः × ____________________
8. विशदम् × ____________________
9. पुण्याः × ____________________
10. अमृतम् × ____________________

## III. सन्धिच्छेदं कुरुत-

1. पतत्यैन्द्रं - ________ + ________
2. स्यात्तु - ________ + ________
3. यदन्तरिक्षात् - ________ + ________
4. विमलोदकाः - ________ + ________
5. याश्च - ________ + ________

## IV. सन्धिं कुरुत-

1. नभः + तलात् = __________
2. देशकालौ + अपेक्षते = __________
3. लवण + अन्वितम् = __________
4. च + उत्तैः = __________
5. अमृत + उपमम् = __________



unit 7.indd 44 21-03-2019 10:12:34

## V. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. जलं कस्मात् पतति ?
2. जलस्य षड्गुणं किम् ?
3. श्वेते पाण्डरे च जलं कीदृशं भवति ?
4. कपिले ऊषरे च जलं कथं भवति ?
5. कस्मिन् जलं कटु मधुरं च भवति ?
6. कीदृशं सलिलं प्रधानम् ?
7. उत्तमं पानीयं किम् ?
8. कीदृशं जलम् अमृतोपमं भवति ?

## VI. सविस्तरम् उत्तरं लिखत-

1. जलस्य षाड्गुण्यं विवृणुत ।
2. जलस्य वैविध्यं यथाग्रन्थं लेखत ।

## VII. श्लोकं पूरयत-

1. ________________ विमलं लघु षड्गुणम् ।

   ________________ भ्रष्टं पात्रमपेक्षते ॥

2. कटु पर्वतविस्तारे ________________ ।

   एतत् षाड्गुण्यामाख्यातं ________________ ॥

3. ________________ ________________

   अरूक्षमनभिष्यन्दि सर्वं पानीयमुत्तमम् ॥

************************



unit 7.indd 45 21-03-2019 10:12:34

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

अस्माकं सौभाग्यम् अस्ति यत् पृथिवी जलीयः ग्रहः वर्तते। जलं सौरमण्डले दुर्लभं वर्तते। अन्यत्र कुत्रापि जलं नास्ति। पृथिव्याः जलं पर्याप्तम् अस्ति। अतः पृथिवी नीलग्रहः इति उच्यते।

जलं निरन्तरं स्वरूपं परिवर्तते। सूर्यस्य तापेन बाष्पस्वरूपं , शीतले सति सङ्घनीकरणे मेघस्वरूपं, वर्षामाध्यमेन जलस्वरूपं धरति।

अस्माकं पृथिवी स्थलशाला इव अस्ति, पौनः पुण्येन जलस्य उपयोगः क्रियते। भूम्यां जीवनाय आवश्यकतत्त्वं वर्तते। जलस्य वितरणं पृथिव्याम् असमानम् अस्ति।

पृथिव्याः 75% भागः जलेन आच्छादितः वर्तते।

यद्यपि पृथिव्यां स्थलस्य अपेक्षया जलस्य मात्रा अधिका वर्तते , तथापि अनेकेषु देशेषु जलसमस्या अस्ति। किन्तु पृथिव्याः संपूर्णं जलं पातुं योग्यं नास्ति।

पृथिव्याः 94.30% जलं महासागरेषु विद्यते। हिमाच्छादितं जलं 2% भूमिगतं जलं 0.68% तडागानाम् अलावणं जलं 0.009%, स्थलायसमुद्राणां, लवणीयतडागानां जलं 0.009%, वायुमण्डले जलं 0.0019%, नदीषु जलं 0.0001% वर्तते।

### जलस्य विभिन्ननामानि

| | | |
|---|---|---|
| 1. नादेयम् | - | नदीस्वरूपं धरति। |
| 2. उद्भिजम् | - | भूमिम् उद्भिद्य धारारूपेण प्रवहति। |
| 3. नैर्झरम् | - | पर्वतस्य उन्नतप्रदेशात् अधः पतति, तत् निर्झरः भवति। |
| 4. सारसम् | - | जलं पर्वतैः अवरुध्यते तत्र सरोवराः भवन्ति। |
| 5. कौपम् | - | कूपे बहुजलराशेः सङ्ग्रहः भवति। |
| 6. वाप्यम् | - | चतुष्कोणाकृतौ जलसङ्ग्रहः भवति। |
| 7. पाल्वम् | - | लघुसरोवरे (पल्वे) जलसङ्ग्रहः भवति। |



unit 7.indd 46 21-03-2019 10:12:34

# पाठ्यातिरिक्तः व्याकरणविषयः

## उपसर्गः

| उपसर्गः | धातुः | उत्तरम् | उपसर्गः | मूलशब्दः | उत्तरम् |
|---|---|---|---|---|---|
| अधि | गम् | अधिगच्छति | पर | उपकारः | परोपकारः |
| अनु | गम् | अनुगच्छति | प्र | आचार्यः | प्राचार्यः |
| उत् | भू | उद्भवति | कु | पुत्रः | कुपुत्रः |
| प्र | नम् | प्रणमते | सु | उक्तिः | सूक्तिः |
| आ | गम् | आगच्छति | दुर् | भावना | दुर्भावना |
| अनु | कृ | अनुकरोति | प्रति | दिनम् | प्रतिदिनम् |
| परि | त्यज् | परित्यजति | स | परिवारम् | सपरिवारम् |
| अनु | भू | अनुभवति | दुर् | जनः | दुर्जनः |
| प्र | विश् | प्रविशति | सम् | तुष् | सन्तुष्टः |
| उत् | स्था | उत्तिष्ठति | अति | अधिकः | अत्यधिकः |
| उप | कृ | उपकरोति | दुर् | आचारः | दुराचारः |
| उप | विश् | उपविशति | सु | आगतम् | स्वागतम् |
| आ | नी | आनयति | उप | वनम् | उपवनम् |
| प्र | सृ | प्रसरति | निर् | जनः | निर्जनः |
| अनु | सृ | अनुसरति | निर् | बलः | निर्बलः |
| वि | नश् | विनश्यति | अति | आचारः | अत्याचारः |

Lesson 8 अष्टमः पाठः

# हितभोजनम्

धर्मार्थकाममोक्षाः इति पुरुषार्थचतुष्टयं भवति । एतत् पुरुषार्थचतुष्टयमेव जीवनस्य लक्ष्यत्वेन निर्धार्यते । तत्प्राप्तये प्रथमं शरीरस्य स्वास्थ्यं सम्यक् भवेत् । अत एवोक्तं "शरीरमाद्यं खलु धर्मसाधनम्" इति । मनुष्यस्य रोगाः प्रायः भोजनवशादेव आगच्छन्ति । कस्मिन् काले किं भुङ्क्तव्यम् इति अजानतः मनुष्यः रोगी भवति । अतः अस्मिन् पाठे ऋत्वनुसारं किं भोजनं सुखकरं भवति इति निर्दिश्यते ।



**ग्रीष्मे -**

शीतं सशर्करं मन्थं जाङ्गलान् मृगपक्षिणः ।
घृतं पयः सशाल्यमन्नं भजन् ग्रीष्मे न सीदति ।।

**वर्षायाम् -**

वर्षास्वग्निबले क्षीणे, कुप्यन्ति पवनादयः ।
तस्मात् साधारणः सर्वो विधिर्वर्षासु राजते ।।



unit 8.indd 48 21-03-2019 10:13:41

शरदि -

तत्रान्नपानं मधुरं, लघुशीतं सतिक्तकम् ।
पित्तप्रशमनं सेव्यं मात्रया सुप्रकांक्षितैः ।।



शिशिरे -

कटुतिक्तकषायाणि, वातलानि लघूनि च ।
वर्जयेदन्नपानानि, शिशिरे शीतलानि च ।।

हेमन्ते -

तस्मात्तुषारसमये स्निग्धाम्लवणान् रसान् ।
गोरसानिक्षुविकृतीर्वसां तैलं नवौदनम् ।।

वसन्ते -

तस्माद्वसन्ते कर्माणि, वमनादीनि कारयेत् ।
गुर्वम्लास्निग्धमधुरं, दिवास्वप्नं च वर्जयेत् ।।



unit 8.indd 49 21-03-2019 10:13:41

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. सशर्करम् - ______________
2. जाङ्गलान् - ______________
3. घृतम् - ______________
4. राजते - ______________
5. पित्तप्रशमनं - ______________
6. वातलानि - ______________
7. शिशिरे - ______________
8. तुषारसमये - ______________
9. तैलम् - ______________
10. स्वप्नम् - ______________

### II. अधो लेखितानां पदानां विरुद्धार्थं लिखत-

1. क्षीणे × ______________
2. कुप्यन्ति × ______________
3. शीतम् × ______________
4. प्रशमनम् × ______________
5. लघूनि × ______________

### III. सन्धिच्छेदं कुरुत-

1. वर्षास्वग्नि - ________ + ________
2. तत्रान्नपानं - ________ + ________
3. नवौदनम् - ________ + ________
4. तस्माद्वसन्ते - ________ + ________
5. स्निग्धाम्ललवणम् - ________ + ________



unit 8.indd 50 21-03-2019 10:13:42

## IV. श्लोकं पूरयत-

1. शीतं स्पर्शकरं मन्थं ________ ।

   घृतं पयः सशाल्यमन्नं ________ ।।

2. ________ लघुशीतं सतिक्तकम् ।

   ________ मात्रया सुप्रकांक्षितैः ।।

3. तस्मात् वसन्ते कर्माणि ________ ।

   ________ दिवास्वप्नं च वर्जयेत् ।।

## V. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. ग्रीष्मे कीदृशम् अन्नं भजन् न सीदति ?
2. पवनादयः कदा कुप्यन्ति ?
3. कदा अन्नपानं मधुरं भवति ?
4. मात्रया किं सेव्यम् ?
5. शिशिरे कानि वर्जयेत् ?
6. हेमन्ते कान् रसान् स्वीकुर्यात् ?
7. वसन्ते कानि कारयेत् ?
8. वसन्ते किं वर्जयेत् ?

## VI. सविस्तरम् उत्तरं लिखत-

1. ग्रोष्मे वर्षायां शरदि च कीदृशम् अन्नं भुञ्जीत?
2. वसन्ते हेमन्ते शिशिरे च किं कुर्यात् इति पाठानुसारं विवृणुत ।

***********************

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

आहारः सात्विकः, राजसः, तामसः इति त्रिविधः । सात्त्विको नाम रस्यः स्निग्धो मधुरः शुचिश्च । स च आयुः सत्वं बलं बुद्धिं सुखमारोग्यं च पुष्णाति ।

राजसो नाम अतिकटु, अति अम्ल, अति उष्णः, तीक्ष्णः, रूक्षः, विदाही च । स च शौर्यमहङ्कारं दार्ढ्यं कामं क्रोधं शोकं च उत्पादयति ।

तामसस्तु यातयामो गतरसः पूति पर्युषितो जुगुप्सितश्च । अयमेव राक्षसाहारो नाम । अयमाहारः मनुष्याणां पदं मात्सर्यम् अभिमानम् अहङ्कारं दम्भं च तनोति ।।

तथा च उक्तं भगवद्गीतायम् –

आयुः सत्वबलारोग्य-
सुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या
आहाराः सात्विकप्रियाः ।।
कट्वम्ललवणात्युष्ण-
तीक्ष्णरूक्षविदाहिनः ।
आहारा राजसस्येष्टाः
दुःखशोकामयप्रदाः ।।
यातयामं गतरसं
पूति पर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं
भोजनं तामसप्रियम् ।।



unit 8.indd 52 21-03-2019 10:13:42

## व्याकरण-अभ्यासः - 4

### धातुः – परस्मैपदी - लृट्  (Future Tense)

#### वद् – to speak

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदिष्यति | वदिष्यतः | वदिष्यन्ति |
| मध्यमपुरुषः | वदिष्यसि | वदिष्यथः | वदिष्यथ |
| उत्तमपुरुषः | वदिष्यामि | वदिष्यावः | वदिष्यामः |

#### पत् – to fall

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पतिष्यति | पतिष्यतः | पतिष्यन्ति |
| मध्यमपुरुषः | पतिष्यसि | पतिष्यथः | पतिष्यथ |
| उत्तमपुरुषः | पतिष्यामि | पतिष्यावः | पतिष्यामः |

#### भू (भव्) – to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |



unit 8.indd   53                                                                                    21-03-2019   10:13:42

Lesson 9 नवमः पाठः

# सत्यसन्धः

यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।

लोके जनानामाचरणं राजायत्तं भवति। राजा समीचीनतया पालयति चेदेव जनाः सन्तुष्टाः भवन्ति। लोकः च दुर्भिक्षरहितो भविष्यति। अतः राजा देशं सम्यक् पालयेत् । तदर्थं राजा सद्गुणान् आश्रयेत् । सद्गुणवानेव राजा कीर्तिं प्राप्नोति। अस्मिन् पाठ्यभागे रामस्य गुणवर्णनपुरस्सरं राजगुणान् ज्ञास्यामः ।।

इक्ष्वाकुवंशप्रभवो
रामो नाम जनैः श्रुतः ।
नियतात्मा महावीर्यो
द्युतिमान् धृतिमान् वशी ।। 1

बुद्धिमान् नीतिमान् वाग्मी
श्रीमाञ्छत्रुनिबर्हणः ।
विपुलांसो महाबाहुः
कम्बुग्रीवो महाहनुः ।। 2

महोरस्को महेष्वासो
गूढजत्रुररिन्दमः ।
आजानुबाहुः सुशिराः
सुललाटः सुविक्रमः ।। 3



समः समविभक्ताङ्गः स्निग्धवर्णः प्रतापवान् ।
पीनवक्षा विशालाक्षो लक्ष्मीवाञ्शुभलक्षणः ।। 4



unit 9.indd 54 21-03-2019 10:14:48

धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
यशस्वी ज्ञानसंपन्नः शुचिर्वश्यः समाधिमान् ।। 5

प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः ।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता ।। 6

सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिमान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ।। 7

स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः ।
समुद्र इव गाम्भीर्ये धैर्येण हिमवानिव ।। 8

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. जनैः - ______________
2. बुद्धिमान् - ______________
3. अंसः - ______________
4. बाहुः - ______________
5. ग्रीवा - ______________
6. हनुः - ______________
7. अरिः - ______________
8. ललाटः - ______________
9. धर्मज्ञः - ______________
10. हितम् - ______________
11. संपन्नः - ______________
12. शुचिः - ______________



unit 9.indd 55 21-03-2019 10:14:49

13. तत्त्वज्ञः - ____________________

14. समुद्रः - ____________________

15. धैर्यम् - ____________________

## II. अधो दत्तानां पदानां विरुद्धार्थं लिखत-

1. वीरः × ____________________
2. नीतिः × ____________________
3. शत्रुः × ____________________
4. शुभम् × ____________________
5. धर्मज्ञः × ____________________
6. हितम् × ____________________
7. यशस्वी × ____________________
8. शुचिः × ____________________
9. रक्षिता × ____________________
10. गुणः × ____________________

## III. सन्धिच्छेदं कुरुत-

1. श्रीमाञ्शत्रुनिबर्हणः - ________ + ________
2. महोरस्कः - ________ + ________
3. गूढजत्रुररिन्दमः - ________ + ________
4. लक्ष्मीवाञ्शुभलक्षणः - ________ + ________
5. सत्यसन्धश्च - ________ + ________

## IV. सन्धिं कुरुत-

1. शुचिः + वश्यः = ____________
2. साधुः + अदीनात्मा = ____________
3. सर्वगुण + उपेतः = ____________
4. कौसल्या + आनन्दवर्धनः = ____________
5. हिमवान् + इव = ____________



unit 9.indd 56 21-03-2019 10:14:49

## V. श्लोकं पूरयत-

1. इक्ष्वाकुवंशप्रवो _______
   नियतात्मा महावीर्यो _______ ।।
2. _______ _______ वाग्मी श्रीमाञ्शत्रुनिबर्हणः ।
   विपुलांसो महाबाहुः _______ _______ ।।
3. धर्मज्ञः सत्यसन्धश्चः _______ _______ ।
   _______ शुचिर्वश्यः समाधिमान् ।।
4. _______ स्मृतिमान् प्रतिभानवान् ।
   सर्वलोकप्रियः साधुः _______ _______ ।।
5. स च सर्वगुणोपेतः कौसल्या _______ ।
   _______ _______ गाम्भीर्ये _______ हिमवानिव ।।

## VI. अधो दत्तानां प्रश्नानाम् उत्तरं लिखत-

1. नियतात्मा महवीर्यश्च कः ?
2. रामस्य शरीराङ्गानि कथं भवन्ति ?
3. रामः केषां हिते रतः ?
4. रामः कस्य समः भवति ?
5. रामः क इव आसीत् ?

## VII. सविस्तरम् उत्तरं लिखत-

1. यथाग्रन्थं सत्यसन्धम् अधिकृत्य पञ्च श्लोकानि व्याख्यात ।

## VIII. ससन्दर्भं भावं लिखत–

1. द्युतिमान् धृतिमान् वशी ।
2. लक्ष्मीवाञ्शुभलक्षणः ।
3. धर्मस्य परिरक्षिता ।
4. धैर्येण हिमवानिव ।

***********************



unit 9.indd 57 21-03-2019 10:14:49

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### रामशासनम्

1. राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमम् ।
ईजे बहुविधैः यज्ञैः ससुहृज्ज्ञातिबान्धवैः ।।
2. न पर्यदेवन्विधवाः न च व्यालकृतं भयम् ।
न व्याधिजं भयं वापि रामे राज्यं प्रशासति ।।
3. सर्वं मुदितमेवासीत् सर्वो धर्मपरोऽभवत् ।
राममेवानुपश्यन्तो नाभ्यहिंसन्परस्परम् ।।
4. आसन्वर्षसहस्राणि तथा पुत्रसहस्रिणः ।
निरामया निशोकाश्च रामे राज्यं प्रशासति ।।
5. नित्यपुष्पा नित्यफलास्तरवः स्कन्धविस्तृताः ।
काले वर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः ।।
6. आसन्प्रजा धर्मरताः रामे शासति नानृताः ।
सर्वे लक्षणसंपन्नाः सर्वे धर्मपरायणाः ।।

## पाठ्यातिरिक्तः व्याकरणविषयः

### समासः

अनेकपदानां एकपदत्वव्यवहारः यत्र भवति, सः समासः । सः संक्षेपतः षोढा भवति ।

| | समासः | तद्भेदाः |
|---|---|---|
| 1. | तत्पुरुषसमासः | 8 |
| 2. | कर्मधारयसमासः | 7 |
| 3. | द्विगुसमासः | 2 |
| 4. | बहुव्रीहिसमासः | 7 |
| 5. | अव्ययीभावसमासः | 2 |
| 6. | द्वन्द्वसमासः | 4 |



unit 9.indd 58 21-03-2019 10:14:49

### द्विगुसमासः (संख्यापूर्वः)

| | | |
|---|---|---|
| 1. एकवद्भावी द्विगुः | - | पञ्चानां वटानां समाहारः – पञ्चवटी । |
| 2. अनेकवद्भावी द्विगुः | - | षण्णां मातॄणां अपत्यं पुमान् – षाण्मातुरः । |

### बहुव्रीहिसमासः (अन्यपदार्थप्रधानः)

| | | |
|---|---|---|
| 1. द्विपदबहुव्रीहिः | - | प्राप्तः अग्निः यं सः – प्राप्ताग्निः । |
| 2. बहुपदबहुव्रीहिः | - | नीलं उज्जवलं च वपुः यस्य सः–नीलोज्ज्वलवपुः। |
| 3. संख्योभयपदबहुव्रीहिः | - | द्वौ वा त्रयो वा – द्वित्राः । |
| 4. संख्योत्तरपदबहुव्रीहिः | - | दशानां समीपे ये सन्ति ते – उपदशाः । |
| 5. सहपूर्वपदबहुव्रीहिः | - | कलाभिः सह वर्तन्ते इति – सकलाः । |
| 6. दिगन्तराललक्षणबहुव्रीहिः | - | उत्तरस्याश्च पूर्वस्याश्च दिशः यदन्तरालं – उत्तरपूर्वा। |
| 7. व्यतिहारलक्षणबहुव्रीहिः | - | केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं – केशाकेशि । |

### अव्ययीभावसमासः (पूर्वपदार्थप्रधानः)

| | | |
|---|---|---|
| 1. अव्ययपूर्वपदाव्ययीभावः | - | अहनि अहनि – प्रत्यहम् । |
| 2. नामपूर्वपदाव्ययीभावः | - | सूपस्य लेशः – सूपप्रति । |

### द्वन्द्वसमासः (उभयपदार्थप्रधानः)

| | | |
|---|---|---|
| 1. द्विपदेतरेतरयोगद्वन्द्वः | - | कंसश्च रावणश्च – कंसरावणौ । |
| 2. बहुपदेतरेतरयोगद्वन्द्वः | - | वापी च कूपश्च तटाकश्च – वापीकूपतटाकाः। |
| 3. द्विपदसमाहारद्वन्दः | - | शीतं च उष्णं च तयोः समाहारः – शीतोष्णम् । |
| 4. बहुपदसमाहारद्वन्द्वः | - | पाणी च पादौ च ग्रीवा च तेषां समाहारः- पाणिपादग्रीवम् । |



unit 9.indd 59 21-03-2019 10:14:49

Lesson 10 दशमः पाठः

# दानवीरः कर्णः

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्विकं स्मृतम् ॥

लोके दानस्य महत्वं वक्तुम् अशक्यं भवति । यतो हि दानं प्रायः सर्वैः कर्तुं शक्यम् । किन्तु येन दानेन स्वस्य हानिः संभवेत् इति ज्ञात्वापि दानं क्रियते चेत्, तत्तु उत्तमोत्तमं कथ्यते । अस्मिन् पाठ्यभागे कर्णेन स्वस्य हानिः भविष्यत्येव इति ज्ञातश्चेदपि, इन्द्राय दानं प्रयच्छति ।



(ततः प्रविशति वेषान्तरधारी शक्रः)

शक्रः - भो कर्ण! महत्तरां भिक्षां याचे ।

कर्णः - भगवन्! कर्णोऽहं भवन्तं नमस्करोमि । आज्ञापय किमिच्छसि? किं ददामि?

शक्रः - महत्तरां भिक्षां याचे ।

कर्णः - महत्तरां भिक्षां भवते प्रदास्ये । गोसहस्रं ददामि ।

शक्रः - मुहूर्तकं क्षीरं पिबामि । नेच्छामि कर्ण ।



unit 10.indd 60 21-03-2019 10:15:43

कर्णः - किं नेच्छति भवान् ? । वाजिनां बहुसहस्रं ते ददामि ।

शक्रः - मुहूर्तकमारोहामि । नेच्छामि कर्ण । नेच्छामि ।

कर्णः - एतत् वारणानां बृन्दं ददामि ।

शक्रः - एतदपि नेच्छामि ।

कर्णः - अन्यदपि श्रूयताम् । अपर्याप्तं कनकं ददामि ।

शक्रः - गृहीत्वा गच्छामि । (गत्वा पुनरागत्य च ) नेच्छामि कर्ण!

कर्णः - तेन हि जित्वा पृथ्वीं ददामि ।

शक्रः - पृथिव्या किं करिष्यामि ?

कर्णः - तेन हि मच्छिरो ददामि ।

शक्रः - नैव । नैव । न भेतव्यम्, न भेतव्यम् ।

कर्णः - प्रसीदतु भवान् । अन्यदपि श्रूयताम् – भगवते यदि रुचितं स्यात्, कुण्डलाभ्यां सह कवचं ददामि ।

शक्रः - (सहर्षम्) ददातु, ददातु ।

कर्णः - (आत्मगतम्) एषः एव अस्य कामः । (प्रकाशम्) गृह्यताम् ।

शल्यराजः - अङ्गराज! न दातव्यम्, न दातव्यम् ।

कर्णः - शल्यराज! अलम् अलं वारितुम् । पश्य -

शिक्षा क्षयं गच्छति कालपर्ययात्  
सुबद्धमूला निपतन्ति पादपाः ।  
जलं जलस्थानगतं च शुष्यति  
हुतं च दत्तं च तथैव तिष्ठति ।।

तस्मात् गृह्यताम् (निवृत्य ददाति)

(भासकृतकर्णभारात् उद्धृतः)



unit 10.indd 61 21-03-2019 10:15:43

## अभ्यासः

I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. भिक्षा - ______________________
2. आज्ञा - ______________________
3. ददामि - ______________________
4. गौः - ______________________
5. क्षीरम् - ______________________
6. वाजिनाम् - ______________________
7. वारणः - ______________________
8. कनकम् - ______________________
9. पृथ्वीम् - ______________________
10. शिरः - ______________________
11. कुण्डलम् - ______________________
12. रुचितम् - ______________________

II. अधो दत्तानां पदानां विरुद्धार्थं लिखत-

1. इच्छसि × ______________________
2. आरोहणम् × ______________________
3. गच्छामि × ______________________
4. महत्तराम् × ______________________
5. अपर्याप्तम् × ______________________

III. पाठात् समुचितम् पदं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. भो कर्ण , _________ याचे ।
2. _________ क्षीरं पिबामि ।
3. वाजिनां बहुसहस्रं _________ ।
4. अपर्याप्तं _________ ददामि ।
5. पृथिव्याः किं _________ ।



unit 10.indd 62 21-03-2019 10:15:43

## IV. अधो दत्तानां प्रश्नानाम् उत्तरं लिखत-

1. शक्रः कस्य नाम अस्ति ?
2. कर्णः प्रथमं किं दातुमिच्छति ?
3. शक्रः किं याचितुम् इच्छति ?
4. कालपर्ययात् का क्षयं गच्छति ?
5. किं किं तथैव तिष्ठति ?

## V. सविस्तरम् उत्तरं लिखत-

1. दानवीरः कर्णः इति पाठं संगृह्य स्वभाषया लेखत ।

************************

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### दानप्रशंसा -

त्याग एको गुणः श्लाघ्यः किमन्यैर्गुणराशिभिः ।
त्यागाज्जगति पूज्यन्ते पशुपाषाणपादपाः ।।
गौरवं प्राप्यते दानान्न तु वित्तस्य संचयात् ।
स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः ।।

### परोपकारप्रशंसा -

धनानि जीवितम् चैव परार्थे प्राज्ञ उत्सृजेत् ।
तन्निमित्तो वर त्यागो विनाशे नियते सति ।।
रविश्चन्द्रो घना वृक्षाः नदी गावश्च सज्जनाः ।
एते परोपकाराय युगे देवेन निर्मिताः ।।
आत्मार्थं जीवलोकेऽस्मिन् को न जीवति मानवः ।
परं परोपकारार्थं यो जीवति स जीवति ।।



unit 10.indd 63 21-03-2019 10:15:43

## व्याकरण – अभ्यासः - 5

### अजन्तनपुंसकलिङ्गशब्दाः

### उकारन्तः नपुंसकलिङ्गः "मधु" शब्दः ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मधु | मधुनी | मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्यां | मधुभिः |
| चतुर्थी | मधुने | मधुभ्यां | मधुभ्यः |
| पञ्चमी | मधुनः | मधुभ्यां | मधुभ्यः |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | मधुनोः | मधुषु |
| सम्बोधन-प्रथमा | हे मधो ! – हे मधु ! | हे मधुनी ! | हे मधूनि ! |

### उकारन्तः नपुंसकलिङ्गः "अम्बु" शब्दः ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अम्बु | अम्बुनी | अम्बूनि |
| द्वितीया | अम्बु | अम्बुनी | अम्बूनि |
| तृतीया | अम्बुना | अम्बुभ्यां | अम्बुभिः |
| चतुर्थी | अम्बुने | अम्बुभ्यां | अम्बुभ्यः |
| पञ्चमी | अम्बुनः | अम्बुभ्यां | अम्बुभ्यः |
| षष्ठी | अम्बुनः | अम्बुनोः | अम्बूनाम् |
| सप्तमी | अम्बुनि | अम्बुनोः | अम्बुषु |
| सम्बोधन-प्रथमा | हे अम्बो ! –हे अम्बु ! | हे अम्बुनी ! | हे अम्बूनि ! |

## उकारन्तः नपुंसकलिङ्गः “मृदु” शब्दः ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मृदु | मृदुनी | मृदूनी |
| द्वितीया | मृदु | मृदुनी | मृदूनी |
| तृतीया | मृदुना | मृदुभ्यां | मृदुभिः |
| चतुर्थी | मृदुने – मृदवे | मृदुभ्यां | मृदुभ्यः |
| पञ्चमी | मृदुनः – मृदोः | मृदुभ्यां | मृदुभ्यः |
| षष्ठी | मृदुनः – मृदोः | मृदुनोः – मृद्वोः | मृदूनाम् |
| सप्तमी | मृदुनि – मृदौ | मृदुनोः – मृद्वोः | मृदुषु |
| सम्बोधन-प्रथमा | हे मृदो ! – हे मृदु ! | हे मृदुनी ! | हे मृदूनि ! |

## उकारन्तः नपुंसकलिङ्गः “जानु” शब्दः ।

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | जानु | जानुनी | जानूनि |
| द्वितीया | जानु | जानुनी | जानूनि |
| तृतीया | जानुना | जानुभ्यां | जानुभिः |
| चतुर्थी | जानुने – जानवे | जानुभ्यां | जानुभ्यः |
| पञ्चमी | जानुनः – जानोः | जानुभ्यां | जानुभ्यः |
| षष्ठी | जानुनः – जानोः | जानुनोः – जान्वोः | जानूनाम् |
| सप्तमी | जानुनि – जानौ | जानुनोः – जान्वोः | जानुषु |
| सम्बोधन-प्रथमा | हे जानो ! – हे जानु ! | हे जानुनी ! | हे जानूनि ! |



unit 10.indd 65 21-03-2019 10:15:43

Lesson 11 एकादशः पाठः

# भूषणमहत्वम्

मानवाः खलु भूषणप्रियाः। भूषणरचनार्थं सुवर्णादिधातूनां वज्रादिरत्नानाञ्च अपेक्षा भवति । विविधविचित्रभूषणानि तु तन्निर्माणकलाकुशलैः रचितानि रच्यमानानि रचयिष्यमाणानि च भवन्ति। तेषु रत्नखचितानि आभरणानि मानवान् सम्यक् अलङ्कुर्वन्ति। अस्मिन् पाठ्यभागे तावत् रत्नानां प्रयोजनमुद्धिश्य उपस्थापितं विद्यते ।

शक्तानुरूपं विदधीत धीमान्
भूषाविधिं विश्वविमाहनायम् ।
सुवर्णरत्नैः कलधौतमुक्ताफल-
प्रवालप्रमुखैर्धनाढ्यः ।। 1



नित्यं भूषणमङ्गलं रतिकरं श्रेयस्करं कान्तिदं
क्षीराम्भोनिधिकन्यकाविलसितं क्रीडापरोज्ज्वालयम् ।
धार्यं मौक्तिकपद्मरागमणिभिः संनद्धशुम्भत्प्रभा
व्यालेप्ताहतदिग्वधूमुखतमस्तोमं सुराणां प्रियम् ।। 2



unit 11.indd 66 21-03-2019 10:16:42

मुक्ताफलैरूर्जितशक्रवीलैः
यथोचितैर्निर्मितहारयष्टिः ।
समीरपैत्यप्रशमं प्रयाति
नित्यप्रसादं नयनोत्सवं च ।। 3

सुवर्णसूत्रं वितनोति कान्तिं
आयुः पराथ्र्यं विपुलां श्रियं च ।
भूतग्रहक्षोभनिवारणं च
विनिर्मितं मारुतपैत्यघाति ।। 4

मुक्तावली विरचिताभिनवैव धार्या
हारावली वितनुतेऽनिलरोगनाशम् ।
दाहादिवृद्धिशमनं वितनोति पैत्यं
हन्याद्धरं नयनयोरपि दोषजातम् ।। 5

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. धीमान् - ____________________
2. सुवर्णरत्नैः - ____________________
3. श्रेयस्करम् - ____________________
4. क्रीडा - ____________________
5. मणिभिः - ____________________
6. प्रभा - ____________________
7. व्याले - ____________________
8. सुराणाम् - ____________________
9. मुक्ताफलैः - ____________________
10. आयुः - ____________________
11. हारावली - ____________________
12. पैत्यम् - ____________________


unit 11.indd 67 21-03-2019 10:16:42

## II. अधो दत्तानां पदानां विरुद्धार्थं लिखत-

1. धीमान् × ____________
2. नित्यम् × ____________
3. श्रेयस्करम् × ____________
4. धार्यम् × ____________
5. प्रियम् × ____________
6. उचितैः × ____________
7. श्रियम् × ____________
8. विपुलाम् × ____________
9. विनिर्मितम् × ____________
10. शमनम् × ____________

## III. सन्धिच्छेदं कुरुत-

1. शक्तानुरूपं - ________ + ________
2. प्रमुखैर्धनाढ्यः - ________ + ________
3. मुक्ताफलैरूर्जित - ________ + ________
4. नयनोत्सवम् - ________ + ________
5. हन्याद्वरम् - ________ + ________

## IV. सन्धिं कुरुत-

1. पर + उज्ज्वालयम् = ________
2. यथा + उचितैः = ________
3. विरचित + अभिनवैव = ________
4. वितनुते + अनिलरोगनाशम् = ________
5. नयनयोः + अपि = ________

## V. अधो दत्तानां प्रश्नानाम् उत्तरं लिखत-

1. धीमान् भूषाविधिं कथं विदधीत ?
2. धनाढ्यः कैः भूषाविधिं कुर्यात् ?



unit 11.indd 68 21-03-2019 10:16:42

3. सुराणां प्रियं किम् ?

4. पैत्यप्रशमं कथं प्रयाति ?

5. सुवर्णसूत्रं कां वितनोति ?

6. अनिलरोगनाशं का वितनुते ?

## VI. सविस्तरम् उत्तरं लिखत-

1. भूषणमहत्वमिति पाठात् यथेष्टं त्रीन् श्लोकान् व्याख्यात ।

************************

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### नवग्रहाः

सूर्यः, चन्द्रः, कुजः, बुधः, गुरुः, शुक्रः, शनिः, राहुः, केतुः ।

### नवरसाः

शृङ्गार – वीर - करुण – अद्भुत – हास्य – भयानक – बीभत्स – रौद्रः - शान्ताः।

### नवधान्यानि

व्रीहयः, आढकाः, मुद्गाः, चणकाः, तिलाः, माषाः, गोधूमाः, बर्बराः, कुलुत्थाः ।

### नवरत्नानि देवताः च

1. माणिक्यम् - सूर्यः
2. मरकतम् - बुधः
3. वज्रम् - शुक्रः
4. मुक्ता - चन्द्रः
5. वैडूर्यम् - केतुः
6. गोमेधकम् - राहुः
7. प्रवालम् - मङ्गलः
8. पुष्यरागः / पुष्परागः - गुरुः
9. इन्द्रनीलः - शनिः



unit 11.indd 69 21-03-2019 10:16:42

## पाठ्यातिरिक्तः व्याकरणविषयः

### प्रत्ययाः

**प्रत्ययाः**

- कृत्-प्रत्ययाः
- तद्धितप्रत्ययाः
- स्त्रीप्रत्ययाः

### कृत् – प्रत्ययाः

| | | |
|---|---|---|
| तुमुन् | - | पठ् + तुमुन् = पठितुम् |
| क्त्वा | - | पठ् + क्त्वा = पठित्वा |
| ल्यप् | - | वि + हस् + ल्यप् = विहस्य |
| क्त | - | खाद् + क्त = खादितः |
| क्तवतु | - | कुप् + क्तवतु = कुपितवान् / कुपितवत् |
| तव्यत् | - | चल् + तव्यत् = चलितव्यः |
| अनीयर् | - | कुप् + अनीयर् = कोपनीयः |
| शत् | - | गम् + शत् = गच्छन् / गच्छत् |
| शानच् | - | याच् + शानच् = याचमानः |

### तद्धितप्रत्ययाः

मतुप् – बुद्धि + मतुप् = बुद्धिमान् / बुद्धिमती / बुद्धिमत्

णिनि – योग + णिनि – योगिन् – योगी / योगिनी / योगी

ठक् – धर्म + ठक् – धार्मिक – धार्मिकः / धार्मिका / धार्मिकम्

त्व – 1. धर्म + त्व – धर्मत्वम्   2. चारु + त्व - चारुत्वम्

तल् – 1. कटु + तल् – कटुता   2. गुरु + तल् – गुरुता

### स्त्रीप्रत्ययाः

टाप् – दक्ष + टाप् = दक्षा

सरल + टाप् = सरला

ङीप् - कर्तृ + ङीप् = कर्त्री

गोप + ङीप् = गोपी

नट + ङीप् = नटी



unit 11.indd 70 21-03-2019 10:16:42

Lesson 12 द्वादशः पाठः

# शिष्यलक्षणम्

लोके छात्राः विद्याम् अभ्यसितुम् इच्छन्ति । ते विद्यालयं गत्वा गुरुमुखात् पाठान् पठन्ति। तेषां छात्राणां कर्म केवलं पठनमेव नास्ति । पठनेनैव ज्ञानं सर्वं प्राप्तुं न शक्नुवन्ति । गुरोरनुग्रहः आवश्यकः । तस्य सेवा अवश्यं करणीया । गुरोरनुग्रहेणैव पुमान् पूर्णः प्रजायते। अतः तस्य निर्देशानुसारं यः करोति सः सच्छात्रः भूत्वा प्रकाशते इति अंशं विज्ञातुम् अयं पाठ्यभागः उपस्थापितः ।



धौम्यमहर्षेः उपमन्युः नाम कश्चित् शिष्यः आसीत् । कदाचित् गुरुः पीनम् उपमन्युं परीक्षितुं - 'वत्स! उपमन्यो! गाः रक्ष इति प्रेषयमास । सोऽपि गुरुवचनात् गाः अरक्षत् ।

कतिपयदिवसानन्तरं पीवानमेव स्थितम् उपमन्युं दृष्ट्वा गुरुः अपृच्छत् – 'वत्स ! उपमन्यो! केन वृत्तिं कल्पयसि ? भृशं पीवाऽसि ! कथम् ? ' इति । सः आचार्यं प्रत्युवाच – 'भोः! भैक्षेण वृत्तिं कल्पयामि' इति। तं गुरुः अब्रवीत् – 'मह्यम् अनिवेद्य भैक्षं नोपभोक्तव्यम्' इति । उपमन्युरपि तथा कृतवान् ।

कश्चित् कालानन्तरं पीवानं तं दृष्ट्वा गुरुः अपृच्छत् – 'केन इदानीं वृत्तिं कल्पयसि ?' इति । तदा सः अवोचत् – पूर्वं भगवते निवेद्य, अपरं चरामि' इति । तदा गुरुः तमादिशत् – "नैतन्न्याय्यम् ।



unit 12.indd 71 21-03-2019 10:17:47

अन्येषां कृते जीवनकष्टं भविष्यति । अतः तथा मा कुरु ” इति । सोऽपि तथैव कृतवान् ।

कश्चित्कालानन्तरं भृशं पीवानं तं दृष्ट्वा गुरुः आह – 'केन इदानीं वृत्तिं कल्पयसि' इति । तदा सः तमवोचत् – 'भोः! एतासां गवां पयसा वृत्तिं कल्पयामि' इति । तमाचार्यः उवाच – नैतन्न्याय्यम् । भवतः मया नाभ्यनुज्ञातम्' इति । सोऽपि तथा इति प्रतिज्ञाम् अकरोत् ।

पुनः पीवानमेव स्थितम् उपमन्युं दृष्ट्वा गुरुः उवाच – केन इदानीं वृत्तिं कल्पयसि ? इति । सः उपाध्यायं प्रत्युवाच – 'भोः! पयसः फेनं पिबामि ' इति । तमुपाध्यायः अब्रवीत् - ' त्वं वत्सानां वृत्त्युपरोधं करोषि । अतः फेनमपि त्वं पातुं नार्हसि' इति । सोऽपि तथा इति प्रतिश्रुतवान्।

ततः सः अरण्ये क्षुधार्तः अर्कपत्राणि अभक्षयत् । तेन अन्धः भूत्वा गच्छति सति कूपे पपात । सूर्यास्ते गतेऽपि आश्रमम् अनागतं शिष्यमन्वेष्टुं धौम्यः वनं गतवान् । तदा 'वत्स ! उपमन्यो ! कुत्र असि' इति आह्वयत् ।

तच्छब्दं श्रुत्वा उपमन्युः प्रत्युवाच – 'अहमस्मि, अर्कपत्राणि भक्षयित्वा अन्धीभूतः सन् कूपे पतितः' इति । तदा गुरुरुवाच – 'अश्विनौ स्तुहि । तौ देवभिषजौ त्वां चक्षुष्मन्तं कर्तारौ' – इति ।

तथा कृते तावपि प्रसन्नौ भूत्वा – "प्रीतौ स्वः । एष ते अपूपः । एनं भक्षय" इति अवोचताम्। तदा उपमन्युरुवाच - "गुरवे अनिवेद्य नाहं भक्षयितुम् उत्सहे" इति । तेन तुष्टौ अश्विनौ प्रीतौ सन्तः "तव लक्षणेन त्वं चक्षुष्मान् भविष्यसि , श्रेयश्च अवाप्स्यसि" इति अवोचताम्। गुरुरपि त्वं सर्ववेदशास्त्राणां ज्ञानं प्राप्स्यसि ” इति आशीर्वादम् अकरोत् ।

सोऽपि स्वलक्षणेन सर्वशास्त्रज्ञानं प्राप्य प्रसिद्धः अभवत् ।

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. पीनः - ____________________
2. दृष्ट्वा - ____________________
3. वत्स - ____________________
4. भैक्षेण - ____________________
5. वृत्तिम् - ____________________
6. निवेद्य - ____________________
7. चरामि - ____________________



unit 12.indd 72 21-03-2019 10:17:47

8. पयसा - ________________

9. उपाध्यायम् - ________________

10. जीवनकष्टम् - ________________

11. फेनम् - ________________

12. क्षुधार्तः - ________________

13. अर्कपत्राणि - ________________

14. कूपः - ________________

15. भिषजौ - ________________

## II. अधो दत्तानां पदानां विरुद्धार्थं लिखत-

1. कदाचित् × ________________
2. दृष्ट्वा × ________________
3. अनिवेद्य × ________________
4. पीवानम् × ________________
5. अपरम् × ________________
6. भृशम् × ________________
7. उपरोधम् × ________________
8. अनागतम् × ________________
9. प्रीतौ × ________________
10. उत्सहे × ________________

## III. अधो लिखितानां प्रश्नानाम् उत्तरं लिखत-

1. धौम्यमहर्षेः शिष्यः कः ?
2. पीनम् उपमन्युं दृष्ट्वा गुरुः काः रक्षितुं प्रेषयामास ?
3. उपमन्युः प्रथमं कथं वृत्तिं कल्पयति स्म ?
4. उपमन्युः पूर्वं कस्मै निवेद्य अपरं चरति ?
5. उपमन्युः पयसः किं पिबति ?
6. उपमन्युः कानि अभक्षयत् ?
7. उपमन्युः अन्धः भूत्वा कुत्र पपात ?



unit 12.indd 73 21-03-2019 10:17:47

8. देवभिषजौ कौ ?

9. तुष्टौ अश्विनौ उपमन्युं प्रति किम् अवोचताम् ?

10. गुरुः कथं आशीर्वादम् अकरोत् ?

## IV. सविस्तरम् उत्तरं लिखत-

1. उपमन्योः शिष्यलक्षणं यथाग्रन्थं लेखत ।

************************

## ? पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

- काकचेष्टा बकध्यानं श्वाननिद्रा तथैव च ।

  अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणम् ।।

- सुखार्थी चेत् त्यजेत् विद्यां विद्यार्थी चेत् त्यजेत् सुखम् ।

  सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम् ।।

- आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया ।

  पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ।

- यस्त्वाचार्यपराधीनः तद्वाक्यं शासते हृदि ।

  शामने स्थिरवृत्तिश्च शिष्यः सद्भिरुदाहृतः ।।

- शान्तो विनीतः शुद्धात्मा श्रद्धावान् धारणेक्षमः ।

  समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो धनी ।

  एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा ।

  गुरुता शिष्यता वापि तयोर्वत्सरवासतः ।।



unit 12.indd 74 21-03-2019 10:17:47

## व्याकरण-अभ्यासः - 6

### धातुः – परस्मैपदी - लृट्  (Future Tense)

#### क्रीड् – to play

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | क्रीडिष्यति | क्रीडिष्यतः | क्रीडिष्यन्ति |
| मध्यमपुरुषः | क्रीडिष्यसि | कीडिष्यथः | क्रीडिष्यथ |
| उत्तमपुरुषः | क्रीडिष्यामि | क्रीडिष्यावः | क्रीडिष्यामः |

#### पा (पिब्)– to drink

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पास्यति | पास्यतः | पास्यन्ति |
| मध्यमपुरुषः | पास्यसि | पास्यथः | पास्यथ |
| उत्तमपुरुषः | पास्यामि | पास्यावः | पास्यामः |

#### वस् – to live

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वसिष्यति | वसिष्यतः | वसिष्यन्ति |
| मध्यमपुरुषः | वसिष्यसि | वसिष्यथः | वसिष्यथ |
| उत्तमपुरुषः | वसिष्यामि | वसिष्यावः | वसिष्यामः |



unit 12.indd   75
21-03-2019   10:17:48

# संस्कृतरञ्जनी - Class VIII
# List of Authors and Reviewers

## Chair Person

**Dr. R. Thiagarajan,** M.A, Ph.D.,
Former Prof. of P.G & Research,
Department of Sanskrit,
Presidency College, Chennai.

## Reviewer

**Dr. V. Mohan,** M.A, Ph.D.,
Asst. Director,
CPR Institute of Indological Research Centre,
Alwarpet, Chennai.

## Authors

**S. Muthukumaraswamy,** Siromani, M.A., M.Phil., B.Ed.
Sanskrit Pandit, Sri Ahobila Math OHSS,
Chennai.

**V. Sriram,** Siromani, M.A., M.Phil., B.Ed.,
Sanskrit Pandit, Sri Ahobila Math OHSS,
Chennai.

## Text Book Writing

**Indological Research Institute**,
CPR Foundation,
Alwarpet, Chennai.

## Co-ordinator

**K.Chandrasekaran**
Lecturer,
DIET, Chennai.

## Art and Design Team

Layout
**Thy designer**

Cover Design
**Kathir Arumugam**

In-House
**Manohar Rathakrishnan**
**Jerald Wilson**

Co-ordination
**Ramesh Munisamy**

Typist
**Shanthi**

This book has been printed on 80 G.S.M.
Elegant Maplitho paper.

Printed by offset at:



Authors List.indd 76 22-03-2019 14:43:36

NOTES



Authors List.indd 77 22-03-2019 14:43:36

NOTES



Authors List.indd 78 22-03-2019 14:43:36